In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला – (ii) 20

पेद्दकोमटिवेमभूपालविरचितया भावदीपिकया सहितः

सप्तशतीसारः

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः
दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादकः
डा जोशी सन्तोषकुमारः
शोधसहायकः

सहसम्पादकः परियोजना – अनुसन्धाता च
श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2023

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

पेद्दकोमटिवेमभूपालविरचितया भावदीपिकया सहितः

सप्तशतीसारः

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः
दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादकः
डा जोशी सन्तोषकुमारः
शोधसहायकः

सहसम्पादकः परियोजना – अनुसन्धाता च
श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् – 07
2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii) 20

Saptaśatīsāraḥ

(with Bhāvadīpikā commentary by Pedakomati vemabhoopala)

(Re-printing of rare book project)
This publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Saptaśatīsāraḥ

ISBN – 978-93-80171-83-8

© Sanskrit Academy

Year	:	2023
Pages	:	xviii+50
Copies	:	300
Price	:	Rs 200

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii) 20
In Public domain. Digitization Muthulakshmi Research Academy

Saptaśatīsāraḥ

(with Bhāvadīpikā commentary by Pedakomati vemabhoopala)

(Published under "Re-printing of rare books project", Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief-Editor
Prof. K. Neelakantham
Director

Editor
Dr. Joshi Santosh Kumar
Research Assistant

Associate Editor & Project Investigator
K.V.Suryaprakash

Sanskrit Academy
Adarsha Shodha Sanstha
(Recognised by Central Sanskrit University, New Delhi)
Osmania University, Hyderabad – 500 007
2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (ii) 20

Saptaśatīsāraḥ

(with Bhāvadīpikā commentary by Pedakomati vemabhoopala)

(Re-printing of rare book project)
This publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Saptaśatīsāraḥ

ISBN – 978-93-80171-83-8

© Sanskrit Academy

Year : 2023
Pages : xviii+50
Copies : 300
Price : Rs 200

Preface

In Public domain. Digitization Muthulakshmi Research Academy

ओम् श्री गुरुभ्यो नमः

।।श्रीशङ्करभगवत्पादाः विजयन्ते ।।

In continuation of reprinting of rare books, now we are bringing out **Saptaśatīsāra** with the commentary called **Bhāvadīpikā.** This is indeed a collection from **Gāthāsaptaśatī of Hala** a well-known book in Prakrit literature. Prakrit language was used in the production of inscriptions, administrative accounts, religious doctrines, secular narratives, plays and songs. This led to the circulation of wide variety of literature along with Sanskrit in ancient and early medieval India. The Prakrit languages have thousands of years of antiquity as common people's languages used in their life. And this language divided on regional basis of their use like Maharashtri, Shauraseni, Magadhi, Ardhamagadhi Paisachi etc. The regional Prakrit languages created great works of international repute and they are Historical and Cultural wealth of India.

According to Hemachandr's śabdānu - śāsanam (शब्दानुशासनम्), Markandeya's Prākrita sarvasva (प्राकृतसर्वस्वम्), Narasimha's Prākritaśabda pradīpikā (प्राकृतशब्दप्रदीपिका) Lakshmidhara's ṣaḍbhāṣāchandrikā (षड्भाषाचन्द्रिका) and other Prakrit grammatical works like Prakritaprakāśa (प्राकृतप्रकाशिका) and Prakritachandrikā (प्राकृतचन्द्रिका) the etymology of Prakrit is given as प्रकृतिः संस्कृतम्,

In Public domain. Digitization Muthulakshmi Research Academy

तत्र भवं तत आगतं वा प्राकृतम् i.e. the source of Prakrit is Sanskrit.

Pravarasena's *Rāvaṇavadham*, Sarvasena's *Harivijaya,* Palitta's *Taraṅgavtī* and *Rasika prakasana,* Vakpati's *Gavudavaho,* Hala's **Gāthāsaptaśatī,** Haribhadra's *Samarādity chandrikā*, Udyotana's *Kuvalaya mālā* are some of well-known works in Prakrit literature.

Hala's Gāthāsaptaśatī :

Among these, **Hala's Gāthāsaptaśatī** is collection of ancient poems written in Prakrit language. It is in fact a collection of seven hundred poems. Gāthā means a poem composed in a particular metre suitable to sing melodiously with *rāga* and *laya*. In Saṅgītaratnākara, its author Śārṅadeva has mentioned that a poem of **Gāthāsaptaśatī** was sung in Śaḍjakisika rāga. It is also said in the *Purātanaprabandha saṅgraha* that Padaliptāchārya the court poet of Śātavāhana had taught some of the poems to Siddha Nagarjuna in a melodious tune. Gahasattasai (**Gāthāsaptaśatī)** is one of oldest extant anthologies of poetry from Indian subcontinent, consisting of the earliest examples of secular verse composed in musical Arya meter. It is written in the language of Maharashtri Prakrit.

Hala was the king of Kuntala Janapada, the southwest region of the former Hyderabad State. Many puranas mention Hala as the 17th Andhra

In Public domain. Digitization Muthulakshmi Research Academy
king in the list of thirty kings of his dynasty. And according to this list Hala had ruled the kingdom only for Five years, sometime during early 1st c. CE. In the beginning the kings of Satavahana ruled over the kingdom from Telangana region. **Their capital city was Kotilingala near the banks of the river Godavari in the Karimnagar District of Telangana.** Hala was a great poet and he honoured many poets and scholars well versed in the Shastras. He has collected hundreds of Gathas and selected 700 most effective Gathas and hence he named it as **Gāthāsaptaśatī.** He has also mentioned the names of poets who composed the gathas in prakrit.

The German Scholar, Albrecht Weber is the First Scholar who gave life to the **Gāthāsaptaśatī** with his translation in 1881. He had secured 17 manuscripts and researched them. He identified 698 poems are common to all the 17 manuscripts. It seems that he did it with the help of Gangadhara Bhatt's book, **Bhavalesha prakashika** in identifying the common poems. He identified 116 special poems from the commentaries of other scholars. He has also identified 151poems from Telugu manuscripts and 35 poems from various Alamkara Shastras. He thus collected 1000 poems and translated them into German. He wrote commentary on each and every poem. He wrote analytical foreword and published it in 1881. He wrote the original poems in Roman script. He prepared the list of the poems common to all scripts and also

In Public domain. Digitization Muthulakshmi Research Academy

prepared the list of poems which are different in different manuscripts. He did a lot of research and gave life to the work.

Pandit Durgaprasad has edited a Sanskrit translation of this in 1911 and published in Kavyamala of Bombay along with the commentary of Gangadhar Bhatt's Bhāvaprakāshika. These three works on **Gaha Sattasai** were considered as original works. 19 scholars wrote commentaries on this work. Jagannath Pathak, in his foreword for his Hindi translation mentioned the names of 14 commentators. Albrecht Weber also furnished the names of some poets in his German translation of 1881.

Bhāvadīpikā - Pedakomati Vema Reddy

Pedakomati Vema Reddy was one among the greatest kings ruled Kondaveeti Kingdom in Andhrapradesh. It is said that Peda Komati Vema Reddy ruled over the Kondveedu during 1407 to 1420. He was the greatest of the king-poets of Reddy dynasty. He was proficient both in sangita and sahitya. He composed Sahityachintamani and Sangithachintamani in Sanskrit. He wrote the first one on the lines of Mammata's Kavyaprakasa. Through the examples cited by him in Sahityachintamani, it can be said that Vema Reddy authored two more books a Bhana (one among the ten types of dramas in Sanskrit) and a Kavya titled as Veeranarayanacharitam. He referred to them as यथा ममैव भाणे, यथा ममैव काव्ये

In Public domain. Digitization Muthulakshmi Research Academy
वीरनारायणचरिते. And the second book *Sangithachintamani*, a treatise on music. According to the catalogues of Trivendram palace library, is a description of the science of music dealing with the variations of ragas, svaras etc.

Pedakomati Vema Reddy also has written commentary **Sringarapradipika** on Amarukasataka and a commentary **Bhāvadīpikā** on **Gāthāsaptaśatī.** He has selected only 104 verses from the Prakrit **Saptaśatī** to write a commentary **Bhāvadīpikā**. The 104 poems include some poems selected from the Commentaries. This book was published in Telugu script from Andhra Vishvakalaaparishat Vishakhapattanam in 1949 with the translation in Telugu by Digumarti Seetaramaswamy. We have taken only the Prakrit and Sanskrit shlokas with Bhavdipika to bring it in front of Sanskrit scholars.

The poems portrayed the village life of those times honestly far away from the smell of any religion. They portrayed the emotions of lovely life through realities of realistic life. We see with our own eyes the villages, green fields, green crops, flower plants with different colours and shapes of flowers, green pastures and shores of Godavari River and the Nature as a whole.

I appreciate the sincere efforts Dr Joshi Santosh Kumar research assistant. He made a thorough research on the life of Hala, Vemabhupala and सप्तशतीसार and prepared a very good foreword to

In Public domain. Digitization Muthulakshmi Research Academy

facilitate further research on **Gāthāsaptaśatī** and Saptashateesaaram. I congratulate Dr Joshi Santosh Kumar and wish him to bring some more critical studies based on the rare Sanskrit works printed in Telugu script.

I thank my amicable deputy directors Dr V. Subrahmanyam and Dr. K. Varalakshmi for their help in the publications of Academy and congratulations to Sri K. V. Suryaprakash senior research assistant and in charge of project of reprinting of rare books. He has readily agreed to publish this book under the reprinting of rare books. I bless my young and sincere research scholar Mr Joshi Bharadwaj who is ever ready for any help.

I thank Prof Srinivasa Varkhedi Hon'ble V.C. and Prof. Ranjit Kumar Barman Registrar I/c Central Sanskrit University, New Delhi for their continuous encouragement and for sanctioning such projects to Sanskrit Academy. I thank our Hon'ble Chairman Prof. D. Ravinder V. C. and Prof. P. Lakshmi narayana Registrar of Osmania University for their amicable support for the development of Sanskrit Academy. I thank Prof. Gayatri Muralikrishna Director, Aadharsh Institutions in CSU Delhi.

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing this book on time.

सुधीजनविधेयः

Prof. K. Neelakantham

Directo

In Public domain. Digitization Muthulakshmi Research Academy

भावदीपिकाप्रकाशः - परिचयः

प्रकृतिः संस्कृतं तत आगात् प्राकृतम् इत्यनया हेमचन्द्रोक्त्या प्रकृतिमूलम् – संस्कृतं इति संस्कृतात् प्राकृतं आगतम् इति ज्ञायते। कालक्रमेण प्राकृतस्य प्राचुर्यम् अवर्धतेति, ग्रन्थरचनाः, सामान्यकार्यकलापाश्च अतिविस्तृतया अभवन्निति इतिहासाध्ययनेन, साहित्याध्ययनेन च ज्ञायते। विस्तृतेऽस्मिन् प्राकृतसाहित्येतिहासे **गाथासप्तशतीग्रन्थराजस्य** विशिष्टं स्थानं वर्तते ।अयञ्च गाथासप्तशतीग्रन्थः विभिन्नगाथानां सङ्ग्रहरूपः। एताः गाथाः मुक्तकाः। मुक्तकाः स्वतन्त्रभावद्योतका भवन्ति। पूर्वोत्तरगद्यपद्यादीनां समन्वयः मुक्तकानां न भवति। प्रबन्धमध्ये भवति चेदपि मुक्तकं अन्येषां सहायतां विनैव स्वतन्त्र्यतया प्रवर्तते इति लोचनकारेण अभिनवगुप्तेन स्पष्टीकृतं ध्वन्यालोकटीकायाम्[1]। एतादृशानां स्वतन्त्ररसभाव स्फोरकानां मुक्तकानां रचनां कर्तुं साधारणः कविः नैव शक्नोतीति, रसबन्धाभिनिवेशिनः कवय एव प्रबन्धेष्विव मुक्तकेष्वपि औचित्यमभिवर्णयितुं प्रभवन्ति। तादृशाः प्रतिभासम्पन्ना एव महाकविपदभाजः भवन्तीति आनन्दवर्धनः स्पष्टीचकार।[2] अपि च मुक्तकं संस्कृतनिबद्धं, प्राकृतनिबद्धं,

---

[1] मुक्तकं अन्येन नालिङ्गितं। स्वतन्त्रतया परिसमापिति निराकांक्षार्थमपि प्रबन्धमध्यवर्ति मुक्तकमित्युच्यते।

[2] तत्र मुक्तकेषु रसबन्धाभिनिवेशिनः कवेस्तदाश्रयं औचित्यं मुक्तकेषु प्रबन्धेष्विव रसबन्धाभि-निवेशिनः कवयो दृश्यन्ते । "प्रतीयमानानुप्राणित काव्यनिर्माणनिपुण प्रतिभा भाजनत्वेनैव महाकवि व्यपदेशो भवतीति "

In Public domain. Digitization Muthulakshmi Research Academy

प्राकृतापभ्रंशनिबद्धमिति मुक्तकभेदान् निरूपयन् गाथासप्तशतीत्यादि काव्यानि उत्तमप्राकृतमुक्तानीति प्रत्यपादयत् सः। गाथासप्तशत्यां एतादृशमहाकवयः त्रिशताधिकाः स्वमुक्तकैः दृश्यन्तेत्यवदत् ।

गाथायाः लक्षणम्

अयं च गाथानामक छन्दोविशेषः ऋग्वेदे एव प्रथमं दृश्यते । अत्र गाथा गानरूपेण पद्यरूपेण च दृश्यते। ततः ऐतरेयारण्यके पद्यभेदरूपेणाङ्गीकृत इति ज्ञायते। तत्र ऋचः देवतास्तुतौ गाथाः मनुष्यस्तुतौ चोपयुक्ताः। शतपथब्राह्मणे कीर्तिमतां बहूनां राज्ञां दान स्तुत्यादयः गाथास्वेवोपवर्णिताः। एवम् अत्यन्तप्राचीनकालादेव जनबाहुल्ये स्थिता गाथा कालक्रमेण प्राकृतभाषामयमभवत्।

गाथासप्तशत्यां गाथास्सर्वा मुक्तकरूपेणैव रचिताः। गाथा नाम उदात्तः उत्तमः रसानुकूलसङ्घटनाधर्मः इति वक्तुं शक्यते। प्राकृते प्रसिद्धछन्दोविशेषः गाथा। प्रथम-तृतीयपादेषु द्वादश मात्राः, द्वितीयपादे अष्टादश मात्राः, चतुर्थपादे पञ्चदश मात्राः भवन्ति। आहत्य पूर्वार्धे त्रिंशत् मात्राः, उत्तरार्धे च सप्तविंशति मात्राः स्युरित्येतस्य लक्षणमुक्तं प्राकृतपैङ्गले [3] ।

हालस्य गाथासप्तशती परिचयः

इदानीम् उपलभ्यमानेषु प्राकृतकाव्येषु गाथासप्तशती अत्यन्तपुरातना। सप्तशतीग्रन्थे मकरन्दसेनः, अमररायः,

---

[3] पढमं बारह मत्ता बी ए अट्टार एहिं संजुत्ता ।
जह पढमं तहती आं दह पंचवहूसि आ गाहा ।।

In Public domain. Digitization Muthulakshmi Research Academy

कुमारिलः, भीमस्वामि इत्यादीनां प्राकृतग्रन्थकृतां नामानि दृश्यन्ते। अतः एतस्मात् पूर्वमपि प्राकृतकाव्यान्यासन्नित्यवगम्यते। रसिकचक्रवर्तिः हालः गाथानां सङ्कलनम् अकरोत्। अयं च कुन्तलाधीश्वरः। कामगिरिमारभ्य द्वारकान्तं कुन्तलदेश इति शक्तिसङ्गमतन्त्रे निर्दिष्टम्[4]। प्रतिष्ठानपुरं हालस्य राजधानीनगरम्। हालस्य शातवाहन, शालिवाहन, शातकर्णि इत्यादि नामान्तराणि सन्ति।अस्य पिता दीपकर्णिः। हालः प्राकृतभाषाभिमानी पण्डितः,पोषकश्च। हालस्यास्थाने अनेके प्राकृतकविपण्डिताः आसन्निति, तदानीं प्राकृतस्य महोन्नतं स्थानम् आसीदिति ऐतिहासिकाधारैः, तत्कालीन, तदनन्तरकालीन कवीनां उक्तिभिश्च ज्ञायते। हालमुद्दिश्य एतादृशमुक्ताकाः साहित्ये दृश्यन्ते-

के नासन्नाढ्यराजस्य राज्ये प्राकृतभाषिणः।

ऽकाले श्री साहसाङ्कस्य के न संस्कृतभाषिणः[5]।।

भट्टभाणः अपि हर्षचरिते हालं प्रशशंस[6]। गाथासप्तशत्यां नैकेषां कवीनां नामानि दृश्यन्ते। आश्वासान्ते हालः कविवत्सलः प्रमुखसुकविनिर्मिते इति न्यर्दिशत्। अत्र प्रमुखशब्देन अन्यैः कविभिस्सह स्वयं हालोऽपि प्रमुख इत्यवगम्यते।

सप्तशतानि कविवत्सलेन कोटेर्मध्ये।
हालेन विरचितानि सालङ्काराणां गाथानाम्[7]।।

---

4 कामगिरि समारभ्य द्वारकान्तं महेश्वरि।श्रीकुन्तलाभिदो देशो हूणदेशं श्रुणु प्रिये।।

5 मोतीलाल् बनारसीदास् द्वारा प्रकाशित गाथासप्तशत्याः भूमिका- पृष्ठसंख्या 9

6 अविनाशिनमग्राम्यमकरोच्छातवाहनः।
विशुद्धजातिभिः कोशं रत्नैरिव सुभाषितैः।।

7 गाथासप्तशती 1-3

In Public domain. Digitization Muthulakshmi Research Academy

अत्र विरचितानि इत्यस्य – सङ्गृहीतानि इति स्वटीकासु व्याख्याकाराः अलिखन्। अनेनापि प्रमाणेन विविधैः कविभी रचितानां गाथानां सङ्कलनरूपोऽयं ग्रन्थः गाथासप्तशतीरूपेण प्रतिष्ठां प्राप्नोत् इति ज्ञायते। भाणः अमुं ग्रन्थं सूक्तिरत्नकोश इति व्यवहृतवान्। तेलुगुसाहित्ये सुप्रसिद्धकविपण्डितः श्रीनाथः काव्यममुं **शालिवाहनसप्तशतीति** उल्लिलेख। प्राकृतपाठकाः ग्रन्थममुं **नत्तसयी** इति वदन्ति। सप्तशतकात्मके ग्रन्थेऽस्मिन् महाराष्ट्री प्राकृते गाथाः दृश्यन्ते।

पेदकोमटिवेमभूपालः

महम्मदीयेभ्यः आन्ध्रदेशस्य विमुक्तिप्राप्त्यनन्तरं प्रादुर्भूतेषु स्वतन्त्रराजसु कोंडवीटि रेड्डि राजानः सर्वसमर्थाः। मध्यान्ध्रदेशं प्रायशः शतं वर्षाणि यावत् क्री श 1324 – 1424 वर्ष पर्यन्तं पर्यपालयन्। एते रेड्डिराजानः अद्दंकि, कोंडवीडु, राजमहेन्द्रवरं, कन्दुकूरु इत्याख्य नगराणि राजधानीः कृत्वा परिपालनं कृतवन्तः।

आन्ध्रदेशात् महम्मदीयान् सम्प्रेष्य, हिन्दूधर्मस्थापनविषये मुषुनूरि प्रोलय नायकं समर्थितेषु द्विसप्ततिसंख्याकेषु नायकेषु **वेमारेड्डिः** अत्यन्तप्रधानः। वेमारेड्डेः दक्षिणान्ध्रदेशे रेड्डिराज्यस्थापनविषये तस्य मातुलः नागसेनानी, चत्वारः सोदराश्च असंख्याकैः सैन्यैः बलपराक्रमैश्च स्थलदुर्ग गिरिदुर्गादीन् आक्रम्य स्वायत्तीकृतवन्तः।

In Public domain. Digitization Muthulakshmi Research Academy

वेमारेड्डेः पिता प्रोलयः पितामहश्च वेमयः आस्ताम् । प्रोलयवेमारेड्डेः अग्रजस्य माचारेड्डिमहीपतेः पुत्रः पेदकोमटिवेमारेड्डिः। अस्य कालः 1407-1420 इति ज्ञायते। वेमभूपतिः स्वपालने राज्यसुस्थिरतायै बहुभिः शतृभिः अयुध्यत इति अल्लयवेमस्य **कोरुमल्लि** शसनाधारेण, कोम्मनस्य **शिवलीलाविलास**प्रस्तावनेन च ज्ञायते[8]। ततश्च सः कोण्टवीटि नगरात् राज्यम् पालयामास । वेमभूपतिःस्वयं महाकविः, पण्डितः आलङ्कारिकः सङ्गीतशास्त्रज्ञः[9] आसीत्।

एतस्य विद्यारसिकतां दृष्ट्वा विजयनगराधीश्वराणाम् आस्थानकविः वामनभट्टभाणः एनं समाश्रयत्। एवं प्रसिद्धतेलुगुकविपण्डितः कविसार्वभौमः श्रीनाथोऽपि अस्यास्थाने आसीत्। वेमभूपतिः साहित्यचिन्तामणिः, सङ्गीतचिन्तामणिः, वीरनारायणचरित भाणः, श्रृङ्गारदीपिका नाम्ना अमरुककाव्यस्य व्याख्यानम्, भावदीपिकाख्यां प्राकृतगाथानां व्याख्याम् अपि च विभिन्नशास्त्रग्रन्थान् अरचयत् ।

वेमभूपतिः कविपण्डितेभ्यः अनेकानग्रहारान् ददौ। आयुर्वेदशास्त्रपारङ्गताभ्यां भास्करार्य-सिङ्गनामात्याभ्यां वेमवरम्, पोन्नुपल्लि अग्रहारञ्चादात्। प्रसिद्धज्यौतिषपण्डितः पेद्दियज्वा अस्मै

---

8 हत्वा कोमटिवेमसैन्यनिकरं भूयोऽपि रामेश्वरात् इति ।

9 चूडामणिर्नृपाणां दुर्मदपरिपन्थि शिखरिदंबोलिः।
सर्वज्ञचक्रवर्ती पेद्दकोमटि वेमभूपतिर्जयति ।। इत्युक्तम् ।

In Public domain. Digitization Muthulakshmi Research Academy

कल्वसामलनामकं ग्राममदात्। सूर्यसिद्धान्तवेदिने रामचन्द्रज्यौतिष पण्डिताय रुद्रवराग्रहारम् अदात् ।

पितृपितामहाविव वेमभूपालोऽपि पाशुपतशैवमतेऽभिनिवेशं प्रापत्। वेमस्य आस्थानकविः वामनभट्टभाणः शैवमताभिमानी एव। वेमभूपालचरिते कविरयं विन्ध्यवासिनी देवायतने वेमस्य सर्वोपकरणसमग्रपूजां विस्तृततया अवर्णयत् । **जयमहादेवी जयतु त्रिभुरादिकापालिकः जयतु भैरवतन्त्रम्** इत्यादिवाक्यैः वेमः वामनभट्टबाणश्चापि कापालिकभैरवतन्त्रोपासकौ इति ज्ञायते। विद्याधिकारी श्रीनाथकविसार्वभौमः शैवमतावलम्बीति जगद्विदितोऽयं विषयः। तथापि सर्वमतसहनशीली वेमभूपतिः उचितया रीत्या सर्वान् विदुषः सम्मानितवान् । श्रीशैल-सिंहाचल-श्रीकूर्म-काशी-पञ्चारामादि क्षेत्रेषु देवालयेषु अन्नदानकार्यक्रमानपि अनवरतं कारितवान् ।

वामनभट्टभाणः वेमभूपतिं स्वकीये वेमभूपालचरितकाव्ये अद्भुततया अवर्णयत् । धनुष्मतामग्रगण्यः, षाड्गुण्यप्रयोगकुशलः, श्रुतपारदृश्वा रूपनारयण, यवनमहाप्रलयार्णव मध्यपतित वसुन्धरोद्धारक इत्यादिविशेषणानि दृश्यन्ते वेमभूपालचरिते। एवं पेदकोमटिवेमभूपालस्य धर्मकीर्तिलता श्रीशैले अंकुरतां प्राप्य, कुमाराचले संवर्ध्य, पञ्चारामेषु विस्तीर्य, सिंहाचल श्रीकूर्म पुरुषोत्तमक्षेत्रेषु पुष्टिमवाप्य, काशिकाविश्वेश्वरस्य सन्निधौ फलमवाप्नोत् ।

In Public domain. Digitization Muthulakshmi Research Academy

पेदकोमटिवेमभूपालस्यामात्येषु महाप्राज्ञः मामिडि सिङ्गामात्यः। अयं सुप्रसिद्धज्यौतिषपण्डितः सोमसिद्धान्तनामक ज्यौतिषसिद्धान्तग्रन्थस्य गूढार्थदीपिकाख्यां व्याख्यामरचयत् ।अत एव कविसार्वभौमः श्रीनाथः एनं पञ्चाङ्गस्थिरमन्त्ररक्षणकळाप्रौढ इति उभयार्थबोधकतया अवर्णयत् ।

सूरमाम्बा

पेदकोमटिवेमभूपतेः भार्या सूरमाम्बा। इयं कृष्णानदीतीरस्थ धान्यवाटीपुरपालकस्य गन्नमनायकस्य पुत्री। क्री श 1410 वर्षे सन्तानसागराख्यं तटाकस्य प्रतिष्ठापितवती ।

सप्तशतीसारः भावदीपिका

पेदकोमटिवेमभूपालः भावदीपका नाम्ना हालसङ्कलित प्राकृतगाथासप्तशत्याः साररूपेण चतुरुत्तरेकशतं गाथाः स्वीकृत्य संस्कृतभाषायां व्याख्यामरचयत्। वेमभूपालः स्वयं ग्रन्थस्यारम्भे यथा गाथाकोटेः हालः सप्तशतीगाधाः स्वीकृतवान् तथा अयं वेमभूपालः सप्तशतिगाथाभ्यः साररूपेण शतं गाथाः स्वीकृतवान् इति ।

हालः प्राक् सप्तशतीं गाथा कोटेर्व्यधत्त सम्प्रति तु ।
सोऽयं वेमनृपालस्तस्या अपि शतकमाहरत् सारम् ।।[10]

इति श्लोके शतं गाथाः साररूपेण स्वीकृतवानिति निर्देशः यद्यप्यस्ति तथापि प्रस्तुतग्रन्थे चतुरुत्तरशतं गाथाः दृश्यन्ते।

---

[10] सप्तशतीसारः प्रारम्भः

In Public domain. Digitization Muthulakshmi Research Academy

वेमभूपालः स्वस्य काले विद्यमान आन्ध्रदेशस्य पर्यावरणानुकूलाः गाथाः एव सञ्जग्राह। गोदावरीनदीतीरस्थितेषु प्रदेशेषु विद्यमान देवायतनानि, अर्चकाः, वध्वः. ग्रामरथ्याः, प्रपापालिकाः, शालिगोपिकाः, हालिकाः तेषां वेषभूषादिविशेषाः, गृहश्वानः, महिषसम्पत्, युक्तिचमत्कृतिः, इत्यादयः सप्तशतीसारे कवितापाकस्य सम्बद्धवस्तु विशेषाः। अत्र रामणीयकप्रकृतवर्णनाः सहजतया सन्ति। काव्येऽस्मिन् रसराजः श्रृङ्गार एव प्रधानः। ग्रन्थस्यास्य परमं प्रयोजनं तावत् विविधश्रृङ्गारसन्निवेशेषु बहुविधनायिकानां मनोभावप्रदर्शनमेव । भावदीपिका केवलं भावाविष्करणाय कृत प्रयत्नः एव न तु प्रतिपदार्थटीका। व्याख्याकारः कतिचनस्थलेषु व्याख्या इति अपरत्र टीका इति निरदिशत्। प्राकृतव्याकरणविशेषः, सूत्रोद्घाटनविषयः, भावाविष्कारः, ध्वनिवैशिष्ट्यप्रदर्शनम् इति अस्य व्याख्यानक्रमः। अत्र प्रसिद्धलाक्षिणोक्तविधानान्येव अधिकानि दृश्यन्ते ।

वेमभूपतेः सप्तशतीसारग्रन्थस्थ गाथानां प्राकृतभाषा अधुना प्रकाशितगाथासप्तशतीग्रन्थानां भाषायाः अधिकस्थलेषु भिन्ना दृश्यते ।

अमिअं भाअइकंवं (सप्तशतीसारः-2) अमिअं पाउअकव्वं (सप्तशती-2),

बहुलता --- जह अह्माण अमुसिंजामो (सप्तशतीसारः -44)

ण जहा अम्हे मुसिज्जामो (सप्तशती -4-35)

In Public domain. Digitization Muthulakshmi Research Academy

इत्येवं प्रकारेण भाषायाम् भेदाः दृश्यन्ते ।सप्तशतीसारग्रन्थस्थ गाथाः प्रायशः 22 गाथाः मुद्रितसप्तशतीग्रन्थेषु न दृश्यन्ते। किन्तु काव्यप्रकाशः, ध्वन्यालोकः, सरस्वतीकण्ठाभरणम् , काव्यानुशासनम् इत्यादिग्रन्थेभ्यः उद्धृताः इति ऊहितुं शक्यते। अधिकाः हेमचन्द्रकाव्यानुशासने लभ्यन्ते।

सं गाथा 15- अत्त एत्थ -काव्यानुशासनम् (पृ सं 30) निषेधेविधिरूपो ध्वनिः।

सं गाथा 16- अह- काव्यानुशासनम् (पृ सं 167) अस्फुटं व्यङ्ग्यम्।

सं गाथा 88- सं आसा इ अं- काव्यानुशासनम् (पृ 30) निषेधे निषेधान्तररूपोध्वनिः

सं गाथा -89- अच्चिणसु - काव्यानुशासनम् (पृ 32) विधिनिषेधयो र्निषेधान्तररूपो ध्वनिः।

सं गाथा -7- कस्स व -काव्यानुशासनम् (पृ 34) वाच्याद्विभिन्न विषयत्वेन व्यवस्थखापितः

संगाथा -98- णोल्लेइ -काव्यानुशासनम् (पृ 36) अन्यासक्ति वैशिष्ट्यात् अर्थस्य व्यञ्जकत्वम्।

सं गाथा -86- णिअदइआ-काव्यानुशासनम् (पृ 31) विधिनिषेधयो र्विध्यन्तरूपो ध्वनिः।

सं गाथा -76-पंथअ ण- काव्यानुशासनम् (पृ 67)वाक्ये ध्वनिः।

सं गाथा– 58-भमधम्मि अ- काव्यानुशासनम् (पृ 26) विधौ प्रतिषेधरूपो ध्वनिः।

In Public domain. Digitization Muthulakshmi Research Academy

सं गाथा -155-महिलासहस्स- काव्यानुशासनम् (पृ 108) सन्दिग्धप्राधान्ये ध्वनिः।

सं गाथा -85- महुएहि - काव्यानुशासनम् (पृ 31) अविधिनिषेधे विधिरूपे ध्वनिः।

सं गाथा 94- मा पंथ-काव्यानुशासनम् (पृ 54) त्याद्यन्ते ध्वनिः।

सं गाथा 83- वाणियय- काव्यानुशासनम् (पृ 38) व्यङ्ग्याद् ध्वनिः।

सं गाथा 19- वाणीर- काव्यानुशासनम् (पृ 105) व्यङ्ग्याद् वाच्यमेव सातिशयम्।

सं गाथा 87- साहेति -काव्यानुशासनम् (पृ 38) अमुख्यस्य व्यञ्जकत्वम् ।

सं गाथा -20- सिहि पिच्छ- काव्यानुशासनम् (पृ 72) विच्छित्तिः।

सं गाथा 99 - सुव्वइ- काव्यानुशासनम् (पृ 37) प्रस्तावाद् व्यञ्जकत्वम् ।

(इयञ्च पृष्टसंख्या काव्यमाला -70- निर्णयसागर प्रकाशन् -1901 आधारेण दत्ता । वेमभूपालः स्वव्याख्याने अन्यग्रन्थेभ्यः प्रसङ्गानुसारं श्लोकान् उद्धृतवान् । तदेवं वर्तते -

(12) द्वादशश्लोकव्याख्याने अगूढमपरस्याङ्ग काव्यप्रकाशश्लोकान् उद्धृतवान् । 5-45,46

(49) अतर्कितो तु सहसा – अमरकोशः अव्ययवर्गः

(1) अन्यथावस्थिता -काव्यादर्शः 2-221

(25) अयुज्यमानस्य मिथ -सरस्वतीकण्ठाभारणं 2-44

(46) अर्थान्तप्रवृत्तेन -काव्यादर्शः 2-348

In Public domain. Digitization Muthulakshmi Research Academy

(4) इदमुत्तममतिशयनी – काव्यप्रकाशः 1-4

(20) गुणीभूतो रसादिर्यत्र – ध्वन्यालोक 2-5

(5) प्रतिषेधोक्तिराक्षेप -काव्यादर्शः 2-120

(100) प्रसिद्धहेतुव्यावृत्या – सरस्वतीकण्ठाभरणम् 3-9

(6) बुद्धेतस्य समीहित - जयमङ्गलव्याख्या- वात्स्यायन कामसूत्रम् -54

(3) विवक्षाया विशेषस्य – काव्यादर्शः 2-214

(3) विविक्षितगुणोत्कर्षै- काव्यादर्शः 2-330

तेलुगुप्रान्ते एवं साहित्ये च गाधासप्तशत्याःप्रभावः

तेलुगुगाथासप्तशतीग्रन्थाः एवं तदाधारेण रचिता सप्तशतीसारभवादीपिका इत्यादिग्रन्थाः तेलुगुसाहित्ये अत्यन्त प्रभावात्मकाः अभूवन् । हालस्य गाथाः स्वेच्छया अनूदितवन्तः महान्तः तेलुगुपण्डिताः। गट्टि लक्ष्मीनरसिंह शास्त्रिमहोदयानां तेलुगु अनुवादेन सह 1944 तमे वर्षे प्रकाशितः। **आन्ध्रुलु गाथासप्तशती** इत्याख्यः निबन्धात्मकः ग्रन्थः तेलुगुलिप्यां 1968 तमे वर्षे जि वि नारयणेन हैदराबाद् नगरे प्रकाशितः। पण्डितवरेण राल्लपल्लि अनन्तकृष्णशर्ममहोदयः तेलुगुभाषायां 400 गाथाः अनुवादमकरोत्। अयञ्च ग्रन्थः सारस्वतपरिषद्वाराः 1964 तमे वर्षे प्रकाशितः। एवमेव श्री तल्लावज्जल शिवशंकरशास्त्रिमहोदयाः गाथासप्तशत्यां प्रतिशतकं चतुर्दशपद्यानि स्वीकृत्य शतं गाथाः तेलुगुभाषायां अनूदितवन्तः।एवमेव गाथासप्तशत्याः अनुवादाः नैकासु भाषासु समागताः। एतेषां सर्वेषां ग्रन्थानामवलोकनेन

In Public domain. Digitization Muthulakshmi Research Academy

प्राकृतगाथानां सामाजिकानां च सम्बन्धः अविनाभावेति स्पष्टं भवति।

सहृज्जनसुधीविधेयः
डा. जोषि सन्तोषकुमारः

In Public Domain. Digitization: Muthulakshmi Research Academy

प्राकृत सप्तशतीसारार्थव्याख्याभावदीपिका

हालः प्राक् सप्तशतीं गाथाकोटेर्व्यधत्त संप्रति तु
सो ऽयं वेमनृपाल स्तस्याऽपि शतकमाहरात् सारम् ॥

पशुबइणो रोसारुणपडिमासंकंत गौरिमुह अन्दम् ।
गहि अंघ पंकअं विअ संझा सलिलांजलिं णमह ॥ १

पशुपते रोषारुणप्रतिमासंक्रन्त गौरिमुखचन्द्रम् ।
गृहीतार्घपंकजमिव संध्यासलिलाञ्जलिं नमत ॥

अथ शालिवाहननरेन्द्रो निर्विघ्नग्रन्थपरिसमाप्त्यर्थमिष्टदेवता नमस्कारमादौ निबध्नति ।

व्या - गौरीमुह अन्दमित्यत्र गभिरग इति नत्वम् । पशुपतेस्संध्यासलिलांजलिं नमत - कथमिव स्थितम्? रोषारुण प्रतिमासंक्रन्तगौरीमुखचन्द्रम् संगृहीतार्घपंकजमिव स्थितम् - अत्र गौयरिषकारणं संध्यावनितावन्दनम् - यतः स्त्रीणाम् । अन्य- संगमवशात् ईर्ष्यमाणो भवति । अर्घंजलौ पुष्पं वा, फलां वा निक्षेप्तव्य- मिति विधानात् - गृहीतार्घपंकजमिवेत्युक्तम् - अत्र उत्प्रेक्षालंकारः।

अन्यधावस्थितावृत्तिश्चेतनस्येतरस्य वा ।
अन्यधोत्प्रेक्षते यत्र तामुत्प्रेक्षां विदुरर्बुधाः ॥

इदानीं स कविः प्रशंसापूर्वं काव्यस्योपदेयमाह -

अमिअं बा अइकंवं पठि दुं सोढुंवि जेण जाणंति ।
कामस्सततततंकंती कुणंतिकह देण लज्रंति ॥ २

अमृतं प्राकृतकाव्यं पठितुं श्रोतुं च ये न जानंति ।
कामस्य तंत्रतात्पर्यं कुर्वन्ति कथं तेन लज्रंते ॥

व्या - पा अइकंवं इत्यत्र प्रतिगे प्रतीपगे इति अत्वम् । ततिशशब्दस्तात्पर्यवाची, परूत्तादिषु पाठात् सिद्धः । अत्र प्राकृतकाव्यस्यामृतवत् आह्लदकत्वात्

In Public domain. Digitization Muthulakshmi Research Academy

अमृतत्वारोपः - सर्वत्र कामसिद्धान्तस्य निरूपणार्थदितत्पठितुमन्येन पर्यठयमाने श्रोतुं वा ये न प्रथन्ते तेषाः कामतन्त्रतात्पर्यकारणं लज्ञावहं कथं न भवतीत्यभिप्रायः । तस्माद् अवश्यं ज्ञातव्यमित्यस्योपादेयता - अमृतत्वरूपणात् प्रशंसाहेतुरलंकारः - श्रवणपठनाभावस्य लज्ञावहत्वात् ।।२।।

अपि च -

गाहाणअ गेआणअ तंतीसंदाण वोंथ महिलाण ।
ताणं संचिअ दडो जेताण रसं णजाणंति ।। ३

गाथानां गेयानां तंत्रीशब्दानां प्रौढ़महिळानाम् ।
तेषां स एव दंड्यो येतेषां रसं न जानंति ।।

व्या - अत्र ताणे तच्छब्दः प्रसिद्धः गाथाभिः प्रत्येकं संबध्यते । अत्र गाथानामुपादेय गेयादिसाहचर्यादुपदेयता - अवश्यं ज्ञातव्यानं रसावहानां गायनादीनां अज्ञानात् तथाविध सुखेनात्मानां वञ्चयतामात्मद्रोहिणां दण्डः क इत्यपेक्षायां स एव दण्डः - तद् ज्ञानाभाव एव दण्ड इत्युक्तम् - तस्माद् विशिष्टो दण्डो नास्तीति भावः - अतिशयोक्तिरलंकारः -

'विवक्षया विशेषस्य लोकसीमातिवर्तनी ।
असावतिशयोक्ति स्यादलंकारस्सतां मता' ।।

इत्युक्तत्वात् - गाथारसज्ञेन दण्डकथनेन एतदुत्कर्षो द्योतते यद्वा तुल्ययोगितालंकारः ।

'विवक्षितगुणोत्कर्षैर्यस्समीकृत्य कस्यचित् ।
कीर्तनं स्तुतिनिंदार्थं सा मता तुल्ययोगिता ।।इत्युक्तत्वात् ।।३।।

प्रियं वशिकर्तुमुद्यतास्सखीस्सख्याह

पणमह माणस हला चलने किं देव एहि अंणेहि ।
जंस वसादेण विओघेलइ वा अन्त वासेसु ।। ४

प्रणमत माननस्य हे सख्यश्चरणौ किंदैवतैरन्योन्यै ।
यस्य प्रसादेन प्रियो घ्रर्णति पादान्तपार्श्वेषु ।।

In Public domain. Digitization Muthulakshmi Research Academy

व्या - घोल इत्यत्र घूर्णे "घमुघहोल घलडुला" इति घोलादेशः प्रियं वशीकर्तुं अन्य देवता न सेव्या - अस्य फलस्य दुर्लभत्वात् - किंतु मान एकस्सेव्यः - तस्मिन् सेविते सति तत् प्रसादेन प्रियः पादयोर्लुन् वश्यो भवति - तस्यात्मन एव सेव्य इत्याशयः। अत्र हेतुरलंकारः - मान प्रणामस्य प्रियावर्जनहेतुत्वात् । लक्षणा मूलपदगतात्यंततिरस्कृतः अविवक्षित वाच्यो ध्वनिः - घोष इत्यनेन प्रणामलक्षिते प्रियवशंवदत्वरूपस्य फलस्य गम्यमानत्वात्। ध्वनिर्नर्मवाच्यादतिशयितं काव्यं तथा चोक्तम् - ''इदमुत्तम मतिशयिनि व्यंग्ये वाच्याद् ध्वनि''रित्यादि ।

काचिदुपायेन मानात् सखी निवारयति -

सच्चं कलहेकलहे सुराम्भोणवोणवो होलाः ।
माण उणमाणंसिणि गरुओ पेम्मं विणासेला ॥ ५

सत्यं कलहे कलहे सुरतारम्भो नवो नवो भवति ।
मानः पुनर्मनस्विनि गुरुः प्रेम विनाशयति ॥

व्या - माणंसिणीत्यत्र सवृद्यादाविर्बिंदुठ - अत्र मानो कर्तव्य इत्यनुनीय विफलासु सखिषु काचिद् विदग्धा सखी नायकेन भेदं गमिता नायिकामुपेत्य- मनस्विनि मानो न कर्तव्य इति व्यथा त्वामाक्षिपंति मुग्धास्सख्य एताः मानः कर्तव्यः माने हि फलं महदस्ति इति नवनवसुरतारम्भरूपं फलं दर्शयित्वा तदापि भूय न पुनः मानो गुरुश्चेत् प्रेमविनाशयति - अतः दीर्घो न कार्यः इत्युपदिश्य तां मानान्निवारवायतीति भावः । अत्र स्वतस्सिद्धार्थशक्तिमूलोलंकारेण अलंकारध्वनिः - हेतुना गुरुर्न कर्तव्य इत्याक्षेपस्य गम्यमानत्वात् यथोक्तं प्रतिषेधोक्तिराक्षेपः ॥५॥

दूती वाक्यम्

सन्च जाणा इ दंहं सरिसंमि जणं मिजुंजये राह ।
मरउण तमं भणिंसं मरणं वि सिलाहणिं जंसे ॥ ६

सत्यं जानाति द्रष्टुं सदृशे जने युज्यते रागः ।
म्रियतां न त्वां भणिष्यामि मरणमपि श्लाघनीयमस्याः ॥

In Public domain. Digitization Muthulakshmi Research Academy

व्या - अत्र द्रष्टुं जानाति सत्यमित्यनेन कुलशिलसौन्दर्यादिभिः गुणैः लोकोत्तरे नायके अभिलाषं गतवतीति गम्यते - सदृशे जने युज्यते राग इत्यनेन लोकोत्तरस्य नायकस्य नायिकायाऽनादृश्यकथनात् नायिकायापि लोकोत्तरत्वं गम्यते - मृगयामीत्यनेन नायिका नवमीं दशां प्राप्तेति गम्यते - त्वां नहि भणिष्यामीत्यनेन भवन् सर्वोपालंभानां भाजनमिति गम्यते - अस्या मरणमपि श्लाघ्यमित्यनेन एतादृशि पुरुषे अनुरागं कृत्वा मृतायामपि तस्यां कीर्तिरिव नोपालंभ इति गम्यते - अथवा अनिष्टमपि मरणमिदानीं सन्तापकारितया तस्या श्लाघ्यमिति गम्यते - अत्र काचिद् विदग्धा दूती नायकं गत्वा नायिकामाह - अर्ह एव नायके अभिलाषं चक्रे सदृशे कुतस्सोयमनुरागो युज्यते जनैरनुमोद्यते एवेति प्रशंसायां विरहव्यधातिशयेन म्रियतां यतोऽस्याः मरणमपि श्लाघ्यं ततो न त्वां भणिष्यामीति वक्रोक्त्या भवान् उपालंभभाजनं भविष्यतीति उपालंभप्रदर्शनेन नायकं प्रोत्साहयतीत्यभिप्रयः - अत्र दूती निसृष्टार्थ तथा चोक्तम् : बुध्वै तस्य समीहितमात्मधियै वारभेतया कार्यं सा निसृष्टार्धेति - अत्र लक्षणमूल वाक्यगतात्यंत तिरस्कृताविवक्षितवाच्यसंकीर्णो ध्वनिः - सत्यं जानाति दृष्ट्वामीत्यादिभिर्गम्यमानैरनुग्राहकैः न त्वां भाणिष्यामीत्यनेन गम्यमानस्यानुग्राह्यत्वात् ।।६।।

कस्याश्चिद् सख्यावचनम्

कस्सवा नहोइ रोसो दंट्ठूणऽपि अए
(दंट्ठ्रणवित्रए) संवणं अहरं ।
संहि बमर पों मांघालणि वा मि
अवामे सहसु एंहीणे ।। ७

कस्य वा न भवति रोषो दृष्ट्वा प्रियायास्सव्रणमधरं ।
स भ्रमर पद्माघ्रायिणि वारितवामे सहस्वेदानीम् ।।

व्या - पोममित्यत्र पद्ममित्यत्रोक्तं त्वं एहि इत्यत्र एहि एंताहेदानीमिदि इदानीं शब्दस्य घन्निमादेशः अत्र काचिद् विदग्धा सखिमुपपतिना दष्टाधरां सखीं

In Public domain. Digitization Muthulakshmi Research Academy

पतिरालोक्य किं या प्रति वक्तीमि तस्मिन् समागच्छति सति तदागमनमजानतीव तां प्रति हे वारित वामास्ये मद्वचनानंगीकारिणि प्रियाया सव्रणमधरं दृष्ट्वा कस्य रोषो न भवति, ईर्ष्याभररहितस्याऽपि रोषो भवतीत्यर्थः- स भ्रमरणपद्माघ्राणं न कर्तव्यमित्युक्तम् - किमर्थं कृतमिदानीं न केवलं वेदनामेव तत् दृष्ट्वा तेन यत् क्रियते तदपि सहस्व इति सखींभर्त्स्यंतीव तस्या अधरक्षतिः भ्रमरकृता अकृतेति तत् प्रतिश्रावयांत्यभिप्रायः - अत्र स्वतसिद्धार्थशक्तिमूलो वस्तुनाऽन्यविषयो वस्तुध्वनिः ।।७।।

नायिका दूतीमुपालभते

जंतुहकंजं तंचिअकंजं मंअंति जंसदा भणसि ।
ओ दल संचवअणे अंजखु वारंगआ तस्स ।। ८

यत्तवकार्यं तदेवकार्यं ममेति यत्सदा भणसि ।
ओ दूति सत्यवचने अद्य खलु पारंगता तस्स ।।

व्या - ओल इति पश्चात्तापसूचने । अत्र नायिका दूतीन् प्रति यत् कृत्यं तदेवमत्कार्यमिति यत् सदा भणसि हे सत्यवचने अद्य तस्य कार्यस्य पारं गतासीत्यनेन असत्यप्रलापिनि मे प्रियसंगमरूपं यत्कार्यं त्वया च प्रेरितं मया ज्ञातमिति तामुपालभत इत्यभिप्रायः । अत्र लक्षणा मूलवाक्यगतात्यंततिरस्कृता विवक्षितवाच्यसंकीर्णध्वनिः । सत्यपदवचन व्यंग्येन वाक्यगतव्यंग्यस्य अनुग्राहकत्वात् ।।८।।

नायिकोक्तिः

अरिअं वामंचि तुए जलएहि ल मरुविदं जता सुलरम् ।
संमीलिअ दाहिण अंतु एवितिह्लं सुलोलंसम् ।। ९

स्फुरितं वामाक्षि त्वया यदेष्यति मे प्रियोऽद्य तस्मात् सुचिरम् ।
संमील्य दक्षिणं त्वया वितृष्णं द्रक्ष्यामि ।।

दाहिण अमीत्यत्र हे दक्षिणे इति दीर्घः । नवा तीर्थ्यं दुःख दक्षिणा दीर्घः इति हा देशः - अत्र काचित् प्रियदर्शनोत्सुका प्रोषितभर्तृकास्पुरणैरक्षिणि

In Public domain. Digitization Muthulakshmi Research Academy

प्रियागमनं शंसति सति हृष्ट्वा हे वामाक्षी वामनेत्र अद्य मे प्रियो यदेष्यति तदा दक्षिणं संमील्य त्वयैवावितृष्णं अवलोकयिष्यामीति पारितोषिकं प्रतिशृणोतीत्यभिप्रायः । ज्ञापकहेतुरलंकारः । अक्षिस्फुरणस्य प्रियदर्शनज्ञापकत्वात्- अत्र वाक्यगतो विवक्षितान्यपरवाच्यो संलक्ष्यक्रमोभावध्वनिः तस्या गम्यमानत्वात्।।९।।

नायिकोक्तिः

आण सआइ दन्ती हत सुरतअ हरिस विकासीअ कवोला ।
गोसे विदणअ मुहे अहसेंति विअंण सन्दिहिमो ।। १०

आज्ञा शतानि ददती तथा सुरते हर्षविकासितकपोला ।
गोसर्गे व्यपनत मुखी असौति प्रियासेनानश्रद्दध्मः ।।

व्या - गोसर्गप्रभातवाची गोर्णादिषु पाठात् सिद्धः - आज्ञा शतानिमुंच पीडय गृहाण जीवय त्रायस्व इत्यादि - अहे त्यदसद प्रथमैक वचनम् अहद्रासु नेति सूत्राय सिद्धम् - अत्र नायको निशायां सुरते हर्ष विकासित कपोलां रसावेशात् आज्ञाशतानि दधतीं अतिदृष्टां स्वकीयां नायिकामुपलभ्य प्रभाते किमप्यजानतीमिव लज्जयावनत मुखीं सेयमित्य श्रद्धेयाञ्च दृष्ट्वा सखीनां श्लाघ्यसुरते दार्ष्ट्यं अन्यदा लज्जेतिगृणद् । वयमस्यामेव प्रतिष्ठितमितितां प्रशंसतीति भावः - अत्र संलक्ष्य क्रम विवक्षितान्यपरवाच्यसंसृष्टो भावध्वनिः। दार्ष्ट्यव्रीलयोः प्रतीयमानत्वात् ।।१०।।

काचित् प्रियमन्यापदेशेनोपालभते

पं (चू) सा (ग अ), णप राअ रंत, किअलोअ लोअणानंद ।
अणंत गमिअ संवरिअ णअ भूसण देवदिण पलणमोदे ।।११

प्रत्यूषागतनवरागरक्तकृतलोकलोचनानन्द ।
अन्यत्र गमितशर्वरिक नभोभूषण (नख भूषणेति च) दिनपते नमस्ते ।।

व्या - अत्र वाच्यार्थः स्पष्टः - व्यंग्यार्थस्तु प्रत्यूषा गत नव रागरक्त प्रियालिंगनवशात्- कुचतटसक्त कुंकुमादिरागरक्तकृतलोकलोचनानन्द अभिलषित

In Public domain. Digitization Muthulakshmi Research Academy

कामिनी संगमवशात् अति प्रसन्नमुखरागतया जनितजन नयनोत्सव- अन्यत्र गमितशर्वरिकेति शर्वरी विरहो लक्ष्यते - नखपद भूषण - दिनपते - न रात्रौ नभन्त इति । इतः परं त्वया संभाषणं न करिष्यामीति अत्र काचित् खंडिता सूर्यप्रणाममाचरंती तत् समये पश्चादागतं कृतागसं कृतापराधं नायकमजानतीव सूर्यस्तुतिं व्याजीकृत्य प्रत्यूषागतेति पदबंधेन तत् कृतापराधान् गणयंती नभस्त इति वक्रोक्त्या तमुपालभत इति भावः लक्षणामूलोऽत्यंत तिरस्कृताविवक्षितवाच्यसंकीर्णो ध्वनिः - उभयशक्तिमूलोपमालंकारेण नभन्त इत्यनेन गम्यमानस्यानुग्राह्यात्वात् ॥११॥

कस्याश्चिद् वचनम्

वाहिंता वठिरिवअणं णदेइरुइ सेल एकं एंकंस ।
अजउरं कंजेणविणा पदिंवमाणे णंरं कच्छे ॥ १२

व्याहृतापि प्रतिवचनम् न ददती ऋष्यत्येकैकस्मै ।
असतीकार्येण विना प्रदीप्यमाने नदीकच्छे ॥

वाहिंतेत्यत्र दैवादि पाठात् द्वित्वं । एकं एंकंसेत्यत्र वीप्सार्थात् तदचिसुपोमस्तु इति पूर्वसुपोमत्वम् अत्र नदीकच्छेदावानलेन दह्यमाने सति असती अन्येन व्याहृता प्रतिवचनम् न ददाति । कार्येण विना एकैकस्मै ऋष्यतीत्यनेन एष मम चिरात् संकेतभूतो नदी कच्छः परिदह्यत इति वैमनस्य चिन्ता विषादादि भावाकुला एवं विचेष्टते पश्येति काचित् सहचारीमाहेतिभावः- अत्र असुन्दरं नाम गुणीभूतव्यंग्यं नदीकच्छदाहेन गम्यमानत्वात् संकेतस्थानभ्रंशांत् .... प्रतिवचनम् न ददातीति एकैकस्मै ऋष्यतीति व्याच्यार्थस्यैव चमत्कार्यत्वात् ॥१२॥

यथा काव्यप्रकाशे -

अगूढमपरस्यांगं वाच्यसिध्यंगमस्पुटम् ।
संदिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ॥
व्यंग्यमेवं गुणीभूतव्यंग्यस्याष्टौ भिदा स्मृताः ॥१२॥

In Public domain. Digitization Muthulakshmi Research Academy

कस्याश्चिद् वचनम्

उंधंचो पियइ जलं जरू जाह वरलंगुलीचिरं वहिद ।
पापा विअवितह तह धारं तनुअं वितणुए हि ॥ १३

ऊर्ध्वाक्षः पिबति जलं यथा यथा विरलांगुलिश्चिरं पथिकः ।
प्रपापालिकापि तथा तथा धारां तनुम् वितनुते हि ॥

अत्र प्रपालि एत्यत्र षैद्रच इति निषेधेपि बहुलग्रहणम् । अत्र पथिकः प्रपापालिकामुखसैन्दर्यदिदृक्षया उन्नमितनयनो विरलांगुलिः यथा यथा जलं पिबति प्रपापालिकापि तथैव तन्मुखदिदृक्षया धारां तनुं वितनुत इति- अनेनोभौ च परस्परानुरक्तौ परस्परावलोकन सुखमनुभवितुं विरलांगुलित्वरूपं धारातनुत्वरूपं च कैतवमाचरत इति पश्येति काचित् सहचरमाहेति भावः अत्र असंलक्ष्यक्रमो विवक्षितान्यपरवाच्य संकीर्णो भावध्वनिः - परस्परानुरागप्रतीतिः ॥१३॥

बालिका वचनम्

अंभोणनम खेतं खंजउ सालिनि कीरणवहेहि ।
जाणंतं अपि परिआ पुंहुंस्तिति छन्ति पुणो मंगम् ॥ १४

अंभो (इति खेदे) नयामि क्षेत्रं स्वाद्यतांशालिरपि कीरनिवहैः ।
जानंतोपि पथिका पृच्छन्ति पुनः पुनर्मार्गम् स्वाद्यतां भक्ष्यताम् ॥

अत्र काचिद् बालिका मात्रा शालिगोपनाय क्षेत्रं व्रजेति नियुक्ता नाहं क्षेत्रं व्रजामि - शालिःकीरनिवहैरपि स्वाद्यतां नाम - यतः तत्र मार्गं जानंतोपि पथिकाः मार्गप्रश्नेन खेदयंतीत्यमुग्धोक्त्या स्वकीयलावण्यातिशय- मोहितानां दर्शनालापकुतूहलीनां तेषाम् अभिप्रायमजानंती स्वमौढ्यं प्रकटितवतीति भावः । अत्र आक्षेपालंकारः हेतुर्वात्र स्वतस्सिद्धार्थशक्तिमूल- स्संकीर्णो वस्तुना वस्तुध्वनिः तत् सैन्दार्यातिशयमौग्ध्य तद्वचन श्रवणाभिलाषाणां प्रतीयमानत्वात् -

In Public domain. Digitization Muthulakshmi Research Academy

असत्यवचनम्

अंता एधंणु मंजल एंथ अहं एण परिएणो सअलो ।
वंथा अराईअंधल मामस अणेणु मंजसिहि ॥ १५

श्वश्रूरत्र निषीदति अत्राहमत्र परिजनस्सकलः ।
पान्थरात्र्यंध मामक शयने निषत्सीसीहि ॥

एंथ इत्यत्र शय्यादावित्येत्वम् - अनुमज्ञल इत्यत्र नेस्सदेर्मज्ञ- इति निपूर्वस्य सीततेः मज्ञादेशः - निरीक्ष्य प्रवादिष्विति नेतृत्वम् - अंधवेत्यत्र लोपो विद्युत् पत्रपीतांधादि पंक्तिस्वार्थे इत्वमत्र काचित् चलितचारित्रमुद्रा प्रोषितपतिका युवतिर्वासरावसाने वसतिं प्रार्थयमानं कंचित्पथिकं युवानमुद्दिश्य समुत्पन्नमन्मथावेशा श्वश्रू सन्निधौ तस्मै शयनस्थानं विविक्तमुद्दिश्य तस्मिन् निशांधतामारोप्य श्वश्रूरत्र निषीदतीत्यादिना श्वश्रवादि सन्निवेशस्थानं दर्शयन्ती स्व शयनस्थानं स्पर्शप्रतिषेदव्याजेन रात्रावत्रमदीयमेव शयनस्थानं त्वया निभृतमुपस्थातव्यमिति स्वयं दूतीवृत्या स्वाभिप्रायमस्मै निवेदयतीति भावः - अत्र स्वतस्सिध्दार्थशक्तिमूलो निषेधरूपेन वस्तुना विधिरूपो वस्तुध्वनिः मच्छयनं निभृतमुपस्थातव्यमिति विधिप्रतीतेः ॥१५॥

नायिका वचनम्

अहअं लंजालुइणि तंसअ उमंत...ल वेम्माला ।
सइ... जणोविणि उणो हला ओकी वा अराएण ॥ १६

अहं लज्ञावती तस्य चोन्मस्तकानि प्रेमाणि ।
सखी जनोपि निपुणो हे सख्यः किं पादरागेण ॥

लंजाजलणीत्यपरलंता शास्त्रनाद्वैरिति तद्गुणे निपातिनः ।

अत्र स्वाधीनभर्तृका प्रगल्भा नायिका प्रसादिकासु लाक्षारागेण पादमलंकर्तुमुद्यतासु : मम पादरागो न कार्यः । यस्मात् प्रियः प्रेमावेशवशंगतो रसातिरेकात् मामवश्यं पुरुषायितं कारयिष्यति । तदानीं निपुणस्सखीजनो

In Public domain. Digitization Muthulakshmi Research Academy

शय्यागतेस्सालक्तकपदांकैः तदनुमान्य लज्ञाकुलां मामपहसिष्यंतीति पादरागनिषेधेन प्रियो मय्यत्यंतमनुरक्त इति स्वसौभाग्यं प्रकटितवतीति भावः अत्र स्वतस्सिद्धर्थशक्तिमूलो निषेधरूपेण वस्तुना संकीर्णो वस्तुध्वनिः लज्ञावतीत्यादि पदप्रकाश्यैर्वाच्यसिध्यंगैर्गुणीभूतव्यंग्यैः पादराग-निषेधप्रतीयमानस्य तत् सौभाग्यप्रकटनस्य अनुग्राहकत्वात् ॥१६॥

दूत्यावचनम्

जअ सरणोवं दंठो गाउमो साहीण बहु जुवावी ।
संभम विनुरुलाणं कंदुच्चरिअंशुहथणाणम् ॥ १७

यदशरण इव दग्धो ग्रामस्स्वाधीनबहुयुवापि ।
संभ्रमविसंस्तुलयो स्तद्दुश्चरितं तवस्तनयोः ॥

अत्र केनचित् प्रेषिता विग्दधा दूती नायिकामुपेत्य तत् स्तनमंडलं ग्रामदहनसमये संभ्रमचलितमति मनोहरं दृष्ट्वा सर्वयुवसु चित्रितेष्विव निश्चेष्टितेषु ग्रामोअयमशरण इव दग्ध इति तस्या स्तनसौन्दर्यवर्णनया तां वशीकर्तुमुत्कर्षयतीति भावः । हेतुरलंकारः । कविनिबद्धवक्तृप्रौढोक्ति सिद्धालंकारव्यंग्येन वस्तुना वस्तुध्वनिः अत्र हेतुना यूनां निश्चेष्टा गम्यते तेन स्तनसौन्दर्यातिशयः ॥१७॥

कस्याश्चिद्गर्वोक्तिः

अंण महिलावसंगं देदेंव करेहि मंझदलअंस ।
पुरुसा एंकान्तरसा णह दोसगुणा विआणंति ॥ १८

अस्य महिलाप्रसंगं देदेव कुरु मम दयितस्य ।
पुरुषा एंकान्तरसा न खलु दोषगुणान् विजानंति ॥

दे इति सन्मुखी करणे - अत्र काचित् प्रगल्भा नायिका यत्र क्वापि कृताभिलाषं पतिं सखीमुखादाकर्ण्य तासां पुरस्ताद् हे दैव मे प्रियस्य अस्य महिलाप्रसंगमवश्यं कुरु । यस्मात् एकत्रैव रसः आसक्तिः येषां ते तया

In Public domain. Digitization Muthulakshmi Research Academy

गाढासक्ताः पुरुषाः दोषगुणाम् न विजानीत । तस्मिन् कृते सति अन्यत्र दोषान् ज्ञात्वा तादृशो गुणः क्वापि नास्तीति मय्येवातितरामासक्तो भविष्यतीति स्वकीयं संवननचातुरीं जानतीमीर्ष्यायां कर्तव्यायामपि प्रत्युत्तरस्यऽन्यासंगं प्रार्थयमाना स्वसौभाग्यगर्वं प्रकटितवतीत्यभिप्रायः । अतिशयोक्तिरलंकारः । तदुत्कर्षस्य गम्यमानत्वात्, अत्र वाक्यगत असंलक्ष्यक्रमो भावध्वनिः गर्वस्य प्रतीयमानत्वात् ।।१८।।

कस्याश्चितद्वचनम्

बाणी कुउ गुंडीण सउणि कोहलहलं सुणं तीए ।
घर कंम वापुडाए वहुव्री सीयंति अंगाला ।। १९

वानीर कुंजोत्संगीन शकुनि कोलाहलं शृण्वंत्याः ।
गृह कर्मव्यावृत्तायाः वध्वः सीदंत्यंगानि ।।

वापुए इत्यत्र प्रतिगे प्रदीपग इति उत्वम् । अत्रैकस्या वानीरकुंजे दत्तसंकेतायाः तदुद्गतशकुनिकोलाहलश्रवणेन तत्रागतमुपपतिं ज्ञातवत्या श्वश्र्वादिनियोगेन गृहकर्मव्यापृतत्वात् विहाय गंतुमशक्ताः स्नुषायाः उत्कठातिशयेन अंगानि ताम्यंति पश्येति काचिदसती सहचरीमाहेत्यभिप्रायः । हेतुरलंकारः । अत्र असुन्दरं नाम गुणीभूतव्यंग्यं, कश्चिल्लतागृहं प्रविष्ट इति व्यंङ्ग्यात् सीदंत्यंगानीति वाच्यस्यैव चमत्कारकारित्वात् ।।१९।।

नायको नायिकामाह :

सिहिवीच्छ लुलिअल केशे वेववंतोरु विणि मीलिअंथंछि ।
दरपुरुसालअ वीसमसीवेन आणासि पुरुसाणजं उंखं ।। २०

शिखिपिञ्छलुलितकेशे वेपमानोरु विनिमीलिताधीक्षि ।
दरपुरुषायित विश्रमशीले जानासि पुरुषाणां यद्दुःखम् ।।

अत्र कश्चिन्नायको नायिकां प्रति त्वं पुरुषायितेन शिखि-पिञ्छलुलित केशे वेपमानोरु अर्धनिमीलिताक्षी सति क्षणेन श्रांतासि । पुरुषाणामस्मकं तन्नजानासीति स्वदुःखनिवेदनव्याजेन तत्पुरुषायितकौतुकं इतः परमपि त्वया

In Public domain. Digitization Muthulakshmi Research Academy

पुरुषायितमंगीकर्तव्यमिति तां प्रोत्साहयतीत्यभिप्रायः । रसवदलंकारः। गुणीभूतो रसादिर्यत्र तत्र रसवदलंकार इत्युक्तत्वात् अत्र गुणीभूतव्यंग्येन रसवदर्थशक्तिमूलो वस्तुना वस्तुध्वनिः संभोगस्य वाच्यसिद्ध्यंगत्वात् ।।२०।।

कस्याश्चिद्वचनम्

अंजं चेअ वउंठो अंजचिअसुंणअंल जाआल ।
रंछामुह देवउल चंहताल अंह्माण अधराल ।। २१

अद्यैव प्रोषितः अद्यैव शून्यानि जातानि ।
रथ्यामुखदेवकुलचत्वराण्यस्माकं च गृहाणि ।।

अत्र काचिदसच्चरिता सत्यौ प्रोषिते सति सखीसमक्षं पतिरद्यैव प्रोषितः अद्यैवरथ्यामुखादीनीत्यनेन सर्वालंकारभूतेन तेन विना अरमणीयानि जातानीति पतिसैभाग्यवर्णनाव्याजेन, पतिप्रवासादस्माकं गृहं शुन्यं रथ्यामुखादीनि दैववशात् जनरहितानि अतस्तव यत्र वा रंतुमिच्चाः तत्रागंतव्यमिति वा तद्दूती वृत्या प्रातिवेशकं श्रावयंन्तीत्यभिप्रायः । यान्यसंभाषणव्याजात् स्वाभिप्रेतार्थमुत्सुकाया श्रावयत्यसां मुख्याद्धा तद्दूतीनि सामता । हेतुरलंकारः। तत् प्रवासस्य शून्यता हेतुत्वात् अतः स्वतस्सिध्दार्थ-शक्तिमूलो वस्तुना अन्यविषयो वस्तुध्वनिः अनेन त्वया समागंतव्यमिति अस्य प्रतीतेः।।२१।।

काचित् प्रपापालिका पथिकयुवानमाह

थोअंविण णीलल मामंझुं णे पंससिर अललंगा ।
आअव भएेण च्छाहावि तापहिअ कीण विंसमसि ।। २२

स्तोकमपि न गच्छति यन्मध्याह्ने पश्य शिशिरतललग्ना ।
आतपभयेन छायापि तस्मात् पथिक किं न विश्राम्यसि ।।

गमिरणमंछेत्यादिना गमेयील इत्यादेशः - छाहेत्यत्र छायायां होकांताविति हादेशः ।

अत्र काचित् प्रपापालिका ग्रीष्ममध्याह्नसमये यत्र कुत्रापि गच्छंतं पथिकयुवानं प्रति अस्मिन् समये तीव्रातपभयात् छायापि शिशिरतलं विनापि

In Public domain. Digitization Muthulakshmi Research Academy
स्तोकमपि न निर्याति । किंपुनरन्यो भवान् किमर्थं न विश्राम्यतीति स्वयं दूतीवृत्या इदानींमत्र न कोपि सञ्चरति, विविक्तोयं प्रदेशः क्षणमात्रं विश्रम्यतामिति स्वाभिलषितं प्रकटितवतीति भावः । अत्र वाक्यगत संलक्ष्यक्रमो भावध्वनिः अनुरागस्य प्रतीयमानत्वात् ।

काचिद्विदग्धा बालिकामुपदिशति

असमंत मंसणंचिअ गच्छ गरंसेस कोहलहलंस ।
बोलाविअ हलहलि अं सपुंति छिंतेण लंगिसिहि ।। २३

असमाप्तमंडनेनैव गच्छ गृहमस्य कौतूहलस्य ।
अपक्रमितानुरागस्य पुत्रि चित्ते नलगिष्यसि ।।

हलहली शब्दो अनुरागवाची देश्यः - परदंतादि पाठात् सिद्धः ।

अत्र काचित् विदग्धा अत्युत्कंठातुरेण प्रियेण मुहुर्मुहुराहूयमानायां प्रियवशीकरणाय आत्मनं मंडयंतीं बालां हे पुत्रि! असमाप्तमंडनेन गच्छ मंडनविलंबनेनालं । इदानीमेव गच्छ । नो चेत् मुहुर्मुहुर्मय्याह्वयति निरादरा नागतेति तस्मिन् रोषेणापक्रांतोत्कंठे सति पश्चात् त्वं गत्वापि तस्य नलगिष्यसीत्यनेन प्रियवशीकरणे मंडनमप्रयोजकम् । उत्कंठा समकालमेव गत्वा तदनुवर्तनमेव प्रयोजकमिति तामुपदिशतीत्यभिप्रयः । अतः स्वतस्सिद्धार्थ शक्तिमूलोवस्तुना अलंकारध्वनिः, प्रियावर्जने तदनुवर्तनस्य हेतुत्वात् ।।२३।।

काचित् प्रियमुपालभते

णिंदुल भंति भणिअं सुकांति खविअंखरं णं जवंति ।
जाहिणा दिंहासि त्वतुमं तादंचि अ सुरुअ सुहिआदा ।।२४

निद्रां लभंते भणितं शृण्वंति स्खलिताक्षरं न जल्पंति ।
याभिर्न द्दष्टाऽसि त्वं ता एव सुभगसुखिताः ।।

अत्र काचित् कस्मिंश्चित् अभिरूपे यूनि कृतानुरागा तं प्रति हे सुभग । याभिर्नद्दष्टोसि ता एव सुखिताः । यतो निद्रां लभंते, स्खलिताक्षरं न जल्पंति, सख्यादिभणितं शृण्वंतीत्यनेन त्वद्दर्शनात् प्रभृति विरहव्यधातिशयात्

In Public domain. Digitization Muthulakshmi Research Academy

निद्रां न लभ्यते, त्वदाहृतचित्ततया सख्यादिभणितं न श्रूयते त्वध्यानवासनाजनितश्रमतया स्खलिताक्षरं प्रजल्पत इत्यात्मनो दशाविशेषान् सूचयन्ती मामैवं विधावस्थां किमुपेक्षस इत्युपालभत इति अभिप्रायः- हेतुरलंकारः । दर्शनाभावस्य निद्रादि हेतुत्वात् अत्र स्वतस्सिध्दार्थ शक्तिमूलो वस्तुना संकीर्णो वस्तुध्वनिः, निद्रां लभन्त इत्यादि वाक्यगतैः व्यंग्यैस्तस्यै विरहार्तैरनुग्राह्यत्वात् ।।२४।।

गणिकामात्रा पृष्टाऽऽह

जंजं सोणिं झाअइ आंगो आसं मह अणिमिसंछो ।
पंछा एमिअ तंतं इच्छाय अतेण दीसंतं ।। २५

यं यं स निध्यायति अंगावकाशं ममानिमिषाक्षः ।
प्रच्छादयामि च तं तमिच्छामि च तेन दृश्यमानम् ।।

अत्र काचिद्वारविलासिनि मात्रा वल्लभेनावर्जनाय कौशलं पृष्टा तां प्रति सकामी मम यद्यदंगं रसावेशादनिमिषाक्षः पश्यति तत्तदंगं प्रच्छादयामि च तेन दृश्यमानमिच्छामीत्यनेन दर्शनेन्यतो विनिवर्तते, अदर्शने क्लेशात्तस्य द्वेषो भविष्यतीत्यंतरा किंचित् प्रदर्श्य तस्याभिलाषो यथा न निवर्तते तथा विलोपयामीति कथितवतीति भावः युक्तिरलंकारः ।

'अयुज्यमानस्य मिथश्शब्दस्यार्थस्य वा पुनः ।
योजना क्रियते या सा युक्तिरित्यभिधीयते ।।

अत्र स्वतस्सिध्दार्थशक्तिमूलोलंकारेण वस्तुध्वनिः युक्त्या प्रियावर्जनकौशलस्य द्योत्यत्वात् ।।२५।।

काचिद्दूती राजकन्यकां प्रति भीरुं युवानं प्रोत्साहयति

आरभमाणस्स धुर लंछी मरणंव होलपुरुसंस ।
तं मरण मणारम्भेवि होल लच्छी उण णहोला ।। २६

आरभमाणस्य धुरं लक्ष्मीर्मरणं वा भवति पुरुषस्य ।
तस्य मरणमनारंभेऽपि भवति लक्ष्मीः पुनर्नभवति ।।

In Public domain. Digitization Muthulakshmi Research Academy

अत्र काचिद्विदग्धा दूती राजकन्यकामभिलषंतं भीरु युवानं धुरं महाकार्यमारभमाणस्य लक्ष्मीर्मरणं वा भवति । तदनारंभेपि मरणं भवति । लक्ष्मीः पुनर्नभवतीत्यनेन उद्योगानुसारिणी लक्ष्मीरि तिवचनत्वात् सहचर माह । उद्योगेनैव लक्ष्मीः प्राप्यतेऽतो भीरुतां विहाय लक्ष्मीसदृशीमेनां प्राप्तुं उद्योगः क्रियतामिति प्रोत्साहयतीत्यभिप्रायः । अत्र स्वतस्सिद्धार्थ शक्तिमूलो वस्तुध्वनिः । अलंकारध्वनिः, रूपकस्य गम्यमानत्वात् ॥२६॥

अत्र कश्चित् सहचरमाह

अंचउ ताव मणहरं एआए मुहदं सणं ।
तं गामचेन्त सीमाविं झंतिख दिंहा सुहावेला ॥ २७

आस्तां तावन्मनोहरं प्रियाया मुखदर्शनमितिमहार्घम् ।
तद्ग्रामक्षेत्रसीमापि झटिति दृष्टा सुखयति ॥

अंचउ इत्यत्र चर गमिष्यामासामीत्युक्तं । अत्र कश्चिद्युवा प्रियतमा निवासभूतं ग्राममागतः । तद्रगामसीमानमासाद्य संजातहर्षस्सन् अये सहचर, प्रियायाः अतिमहार्घ मनोहरं मुखमास्तां तावत् - तज्ञनितनिरतिशय सुखविशेषः ईदृश इति केन वर्णयितुं शक्यते । तत् संबुद्धितया ग्रामक्षेत्रसीमापि दृष्टा झटितीत्येवं सुखयतीति तस्या रूपयौवनलावण्यातिशयेन लोकोत्तरतां स्वकीयमनुरागञ्च प्रकटितवानित्यभिप्रायः । अत्र संलक्ष्य क्रमस्मृतिपरिपुष्टो भावध्वनिः अनुरागातिशयप्रतीतेः ॥२७॥

काचिद्विदग्धा काञ्चिदाह

सूरं च्छवेण पुन्ति एंकं स तुमं अन्जजी वणावेसि ।
हासक...कंखुं मिसाणहोंन्ति देंवाणजोंगारा ॥ २८

सूर्यच्छलेन पुत्रिके तस्य त्वमन्जलिं समर्पयसि ।
हासकटाक्षोन्मिश्रा न भवन्ति देवानंजलिकराः ॥

अत्र काचित् चलितचारित्रमुद्रापूर्वमविदितचारित्रभंगो प्रातिवेशिकी प्रति, हे पुत्रिके, त्वं सूर्यमदिश्य कस्मै अञ्जलिं समर्पयसि । सूर्यायेवेति चेत्

In Public domain. Digitization Muthulakshmi Research Academy
तदयुक्तं यतो देवानां नमस्काराः हान कटाक्षोन्मिश्रा न भवन्तीत्वनेन त्वं विलासहासकटाक्षवीक्षणेन यं कंचन युवानं साभिलाषमवलोकयसि त्वच्चरितं मयाज्ञातिमिति तां स्ववशीकर्तुमाहेत्यभिप्रायः ।

अत्र स्वतस्सिध्दार्थशक्तिमूलो वस्तुध्वनिः, अलंकारेण ज्ञपकत्वहेतुना त्वच्चरितं मया ज्ञातमिति व्यज्यमानत्वात् ।।२८।।

काचिद्देवरमाहा

ठाणे ठाणे वलिआ वलणे वलणे सवेतसकुडुङ्गा ।
णगदसीमं झशमं देअरण दींठा तु ए मुरला ।। २९

स्थाने स्थाने वलिता वलने वलने सवेतसकुडुंगा ।
न गतोस्यस्माकं देवर द्दष्टा त्वया मुरला ।।

काचिदत्र देवरानुरक्ता श्वशुरग्रामे यत्र क्वापि सुखेन संकेतस्थानमलभमाना हे देवर, निश्चितपितृग्रामगमना पूर्वमस्माकं ग्रामं न गतोसि स्थाने स्थाने वलिता वलने वलने सवेतस कुडुंगा मुरळा त्वया न द्दष्टाः। नेति काकुद्वयेन पृच्छन्ती मुरला वर्णनया अस्मद्ग्रामे तत्र तत्र संकेतस्थानस्य सुलभत्वात् निश्शंकं सुरतक्रीडा तत्र सम्भविष्यतीति स्वग्रामगमनाय तं प्रोत्साहयतीति भावः । प्ररोचनालंकारः । प्रोत्सहनार्थयान्येषां प्रशंसा प्ररोचना। अतः स्वतस्सिध्दार्थशक्तिमूलेन अलंकारेण वस्तुध्वनिः प्ररोचनया ग्रामगमनप्रोत्साहस्य गम्यमानत्वात् ।।२९।।

सखी नायिकां विडंबयति

अवलंबिअ माण परमुहिए एंतं समाणिणि वि अंसविंह ।
पुल उंगमो तुह कहेल सं मुहंठिअंहिअअं ।। ३०

अवलंबितमानपराङ्मुख्या यतो गच्छतः मानिनी प्रियस्य ।
पृष्ठ पुलकोद्गमस्तव कथयति संमुखस्थितं हृदयम् ।।

अत्र काचित् विदग्धा सखी अनुनयन्तमायान्तं कान्तमनाहत्य

In Public domain. Digitization: Muthulakshmi Research Academy

मानमवलंब्य परिवर्तितीं सखीं प्रति विपरीतलक्षणया मानिनीति संबोध्य अनुनयति प्रियतमे किमर्थं पराङ्मखी यासि । तत्संर्गसंभवस्तव पृष्ठपुलकोद्गमः त्वद्धृदयं तदभिमुखं कथयतीति सोत्प्रासमुक्त्वा वृथामाने नालमिति तां मानं निवारयतीति भावः। अत्र वस्तुना संकीर्णो अलंकारध्वनिः मानिनीपदव्यंग्येन आक्षेपस्य अनुग्राह्यत्वात् ।।३०।।

काचिद्दूतीनायकमाह

तुह दंसण संतिंह्णा संदं सोऊण णिंगआ जालं ।
तुल बोलंते तालं चिआव आल वोढ़ं विआजाआ ।। ३१

तव दर्शन सतृष्णा शब्दं शृत्वा निर्गतायानि ।
त्वय्यपक्रमति तान्येव पदानि वोढ व्याजातौ ।।

अत्र काचिद्विदग्धा दूती नायकस्य पुरस्तात् विरहिणी नायिका त्वयि यद्दच्छया तेन पथासंचरमाणे सति त्वदालापमाकर्ण्य भवद्दर्शनोत्कंठिता यानि पदानि यावंतं पंथानं निर्गता तथा त्वय्यपक्रामति सति त्वद्दर्शनालाभेन विषण्णा तापावसन्नगात्रतया तानि पदानि प्रति गंतुमुक्तो वोढ़व्या जातेति तस्य निर्भरमवस्था विशेषं सूचयन्ती त्वयेयं संभावनीयेति तं प्रोत्साहयतीत्यभिप्रायः । अत्र संलक्ष्यध्वनिः औत्सुक्यग्लानि विषादपरिपुष्टस्य पुर्वानुराग । विप्रलंभस्य प्रतीतेः ।।३१।।

मुग्धा सखीमाह :

जालवअणालअहमेवि जंपीमो जाल जंवल जंणोवि ।
तालंव देण वअंविआलं हिअअसुहा अंति ।। ३२

यानि वचनानि वयमपि जल्पामो यानि जल्पति जनोपि ।
तान्येन तेन प्रजल्पितानि हृदयं सुखयन्ति ।।

अत्र कयाचित् मुग्धया कस्मिंश्चित् कृताभिलाषया तत्संगमनुभूय सखीनां पुरस्तात् अस्माभिर्जनेन च यानि वचनानि जल्प्यंते तान्येव तेन

In Public domain. Digitization Muthulakshmi Research Academy

प्रजल्पितानि हृदयं सुखयन्तीत्यनेन अनुरागत्वात् प्रियसंबन्धि सर्वमपि मनोहरमिति मौग्ध्यादजानंत्या साश्चर्यं तदुच्चरितवचनानां माधुर्यकथनेन स्वकीयानुरागातिशयः प्रकटित इत्यभिप्रायः । हेतुरलंकारः । तत्प्रजल्पनस्य सुखनिमित्तत्वात् । अत्र असंलक्ष्यक्रमसंसृष्टो भावध्वनिः मौढ्यानुरागयोः प्रतीयमानत्वात् ।।३२।।

काचिज्जारमुपालभते

वंणंतिहि तुहगुणे बहुसोह्महि चिंचछंरं पुरद ।
बालअ सअंचिअ कदरि दंलहो कंस्यस कुंपामो ।। ३३

वर्णयंतीभि स्तवगुणान् बहुशोस्माभिरसतीनां पुरतः ।
बालक स्वयमेव कृतोसि दुर्लभः कस्मै कुप्यामः ।।

व्या - अत्र काचिदसच्चरिता पूर्वं यथेच्छमुपभुक्तं इदानीमन्यासंगमवशात् दुर्लभदर्शनमुपपतिं प्रति हे बालक तव गुणादीन् रूपादीन् असतीनां पुरोवर्णयंतीभिरस्माभिः स्वयं आत्मनैव दुर्लभः कृतोसि । कस्मै कुप्यामः इत्यनेन अस्मन्निमित्त एव अन्यासंगः तेनासंगे नैवायं जनो न स्मर्यते । ममैवेदमकुशलमित्यात्मोपालंभव्याजेन तमुपालभत इत्यभिप्रायः हेतुरलंकारः। गुणवर्णनस्य दुर्लभत्वहेतुत्वात् । अत्र स्वतस्सिद्धार्थशक्ति वस्तुमूलेन वस्तुध्वनिः। आत्मोपालंभेन तदुपालंभस्य गम्यमानत्वात् ।।३३।।

काचित् सखीमाह

आमंति जे वहुंति कुविदं दासंवजे वसाअति ।
तेंचिअ महिलाण विअ सेसा सामिचि अ परान ।। ३४

प्रच्छादयन्ति ये प्रभुत्वं
कुपितां दास इव ये प्रसादयन्ति ।
त एव महिलानां प्रियाः
शेषाः स्वामिन एव वराकाः ।।

छादेन्द्र मंडमीं भोलद्धक वप्पाल सण्णाभा इति छादेर् द्रमादेशः

In Public domain. Digitization Muthulakshmi Research Academy

व्या - अत्र काचित् सख्या भर्तुरनुरागः त्वयि, कीदृश इति पृष्टा तां प्रति ये स्त्रीणां पुरतः प्रभुत्वं न दर्शयन्ति, कुपितां दास उपचरति त एव महिलानां प्रियाः, शेषाः वराकाः स्वामिन एवेत्यनेन एष दुरात्मा बहुशोपराधान् कृत्वा कदाचिदपि मां नानुनयति, प्रभुत्वं दर्शयित्वा व्यथयतीति विषण्णा तस्यानुरागाभावं प्रकटितवतीत्यभिप्रायः । अत्र वाक्यगतसंलक्ष्यक्रमो भावध्वनिः विषादस्य प्रतीतेः ॥३४॥

कस्याश्चिद्वचनम्

अंज मए गंतवं तंस सआस घणं थआ रोति ।
बाला णिमीलि...च्छी वय परिपाडी घरेकुणल ॥ ३५

अद्य मया गंतव्यं तस्य सकाशं घनान्धकार इति ।
बाला निमीलिताक्षी पदपरिपाटीं गृहे कुरुते ॥

व्या - एषा बालिका प्रियतमेन कथितसंकेता घनसमये मेघाक्रान्तमंबरं दृष्ट्वा अद्य मया घनान्धकारे तस्य समीपमवश्यं गंतव्यमिति मत्वा निमीलिताक्षी गृहे पदानुक्रमं करोतीत्यनेन अस्या मुग्धायाः प्रियानुसरणे उत्कंठापश्चेति-काचित् सहचरीमाहेत्यभिप्रयः। अत्र स्वतस्सिद्धर्थशक्तिमूलो वस्तुना संकीर्णध्वनिः। मौढ्यौत्सुक्ययोः निमीलिताक्षी पदपरिपाटीं गृहे करोतीत्यनेन व्यंजकानुप्रवेशात् ॥३५॥

काचित् प्रियमुपालभते

उंणं विणीससं ताकीस मम परंमुहेण सअणंधे ।
हिअअं वविविअ अणुसयेण पिंठं वलीवअसि ॥ ३६

उष्णं विनिश्वसत् कस्मान्मम पराङ्मुख्याश्शयनार्थे ।
हृदयं प्रदीप्यानुशयेन पृष्ठं प्रदीपयसि ॥

व्या - अत्र काचित् स्वकीया नायिका पश्चाच्छयनार्थे शयानं पतिं प्रति पूर्वमपराधशतैर्मम हृदयं त्वया प्रज्वलितमिदानीं प्रियतमाविरहतापात्

In Public domain. Digitization Muthulakshmi Research Academy

उष्णं विनिश्वसन् अनुशयेन पश्चाद्रागमपि किमर्थं प्रज्वलयसीत्यनेन शठ, अपसरेति रोषसंतापातिशयेन संभर्त्सितवतीत्यभिप्रायः । अत्र संलक्ष्य क्रम-व्यंग्यस्संकीर्णो भावध्वनिः । उष्णं विनिश्वसन्नित्यनेन प्रतीयमानत्वात् ।।३५।।

काचिदसतीकस्याश्चिदसत्याः कौशलमाह

खणेण पाणेणअ तह गहिओ मंसलो असअणा ए ।
अणु मंणइ जहिजारं णंकल घरसामि ए एते ।। ३७

खादनेन पानेन च तदा गृहीतो मंडलो सत्या
अनुमन्यते यथाजारं भषति गृहस्वामि न्यायाते

व्या - अत्र सउण इति असतीपर इत्यादिषु पठ्यते । अत्र काचिदात्मानमविश्वस्य पत्या स्वरक्षणार्थं गृहे स्थापितं शुनकं जारहस्तेन प्रदापितैरन्नपानैस्तदागमनं यथानुमन्यते तथावश्यं कृत्वा, गृहपतिना त्वदर्थं सज्जीकृतमन्नपानादिकमनेन भक्षितमिति ताडयित्वा तदागमने यथा भषति तथाविधं कृत्वा तस्य मनसि मय्यागतेपि अयमेनं भषति किं पुनरन्यस्मिन् जन इति एवंविध प्रत्ययोत्पादनेन तं वंचयतीति काचित् सखीमाहेत्यभिप्रायः। अत्र स्वतस्सिद्धर्थशक्तिमूलोलंकारेण वस्तुध्वनिः युक्त्या पतिवञ्चनस्य प्रतीतेः।।३७।।

दूती नायकमाह

महिला सहंस हरिए तुहहि अए सुहअ ठाणंअलहन्ती ।
णिंचं अणंण कंमा अंगं तमिअंवि तणुएल ।। ३८

महिला सहस्रभरिते तव हृदये स्थानमलभमाना ।
नित्यमनन्यकर्मा अंगं तन्वपि तनयति ।।

व्या - अत्र काचिद्दूती नायकं हे सुभग एवंविधा मम सखी त्वच्चित्तं प्रवेष्टुमेवंविधा भवतीत्यनेन तव हृदये प्रवेशाभावात् इयमेतादृशामवस्थां प्राप्ता तस्मादनुगम्यतामिति तं प्रोत्साहयतीत्यभिप्रायः अत्र वाक्यप्रकाश्यः

In Public domain. Digitization Muthulakshmi Research Academy
कविनिबद्धवत् प्रौढोक्तिसिद्धार्थशक्तिमूलालंकारेण अलंकारध्वनिः हेत्वलंकारेण तनोस्तनुकरणेपि तव हृदयं न विशतीति विशेषोक्तिरगम्यमानत्वात् कारणे सति कार्यानुत्पत्तिर्विशेषोक्तिरित्युक्तम् ।।३८।।

नायिका नायकमुपालभते :

तइज महगंडंथल णिमिअं दिंठीणणेसि आंणंतो ।
एंह्वी संचेअअहं तेअक बालाण सादिठी ॥ ३९

तदा मम गंडस्थल स्थापितां द्दष्टिं ननयसि ।
अन्यत इदानीं सैवाहं तावेव कपोलौ न सा द्दष्टिः ॥

व्या - णिमिअशब्द स्थापितवाची देश्यः अफणादिषु पठितः । अत्र नायिका पुरःस्थितमणिमुकुरसमाना वात्मकपोलावत्यादरेण सादरं विलोक्य पश्चात्तादृगनुरागरहितं नायकं प्रति सर्वं तदेव दृष्टिस्तु सा न भविष्यतीत्यनेन इतस्ततः पार्श्वयोस्संचरंतीं मत्कपोलप्रतिबिंबितां सखीमवलोकयन् साभिलाषदृष्टिरासीः, इदानीं तस्यामपक्रांतायां दृष्टिरेतादृशी जाता । अत एव वंचक तव शाठ्यं विदितमासीदिति तमुपालाभत इत्यभिप्रायः अतः स्वतस्सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः । अनेन वाक्यार्थेनशाठ्योद्घाटनस्य वस्तुनो गम्यमानत्वात् ।।३९।।

नायिका पतिमुपालभते - नायिका भर्तारमुपालभते -
नायिका धवमुपालभते

गणिअ उपगूहि अमए कुंकुडसंभे दणझन्तिपासि ।
बन्धो परवसइ वाससंकि रणि अअंमि घरोसि माभाहि ॥ ४०

प्रियतम उपगूढो मया कुक्कुटशब्देन झटिति प्रबुद्धः ।
परवसति वासशंका शील, निजेगृहेऽसि मा विभीहि ॥

व्या - अत्र काचिद्विदग्धा कुलपालिका परदारलंपटं परगृहवासशंकया स्वगेहेपि कुक्कुटशब्देन प्रभातं जातमिति स भयं प्रतिबुद्धं पतिं त्वया परगृहेष्वेव

In Public domain. Digitization Muthulakshmi Research Academy

सकलरात्रयो नीयन्ते न कदाचिदपि स्वगृहे स्थीयत इति उपालभत इत्यभिप्रायः। अत्र स्वतस्सिद्धर्थशक्तिमूलो वस्तुना वस्तुध्वनिः वाच्येन प्रियोपालंभस्य गम्यमानत्वात् ।

काचिद् युवानमाहः

अअदिअह कलहोआ जहजह थणआ विणन्ति कुमारी ए ।
तहतह लंथाआसोंव मंमहो हिअअमाविसल ।। ४१

अनुदिवसकृताभोगौ यथा यथा स्तनौ विनिर्यतौ कुमार्याः ।
तथा तथा लब्धावकाश इव मन्मथो हृदयमाविशति ।।

व्या - अत्र कुमार्यास्तनावित्यादिना इदानीमेषा प्रतिदिनं सविलास हासकटाक्षाभिप्रायवचना जाता पश्येति काचिद्युवानं प्रोत्साहयतीत्यभिप्रायः। अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलोलंकारेण वस्तुध्वनिः । उत्प्रेक्षया विलासहासादिप्रतीतेः ।।४१।।

काचित् कुलटा तापसमाह

भंजंतं सवितुह संग गामिणो णई करंज साहाइ ।
भणकहं अंजलि धंमिअं पाय धरणीचि अच्छिंपन्ति ।। ४२

भंजंतोपि तव स्वर्गगामिनो नदी करंजशाखा ।
भण कथमद्यापि धार्मिक पादौ धरणीमेव स्पृशतः ।।

व्या - अत्र काचित् सच्चरिता प्रतिदिनं शिवपूजार्थं आत्मसंकेतभूत करंजशाखाभंजकं तमपि देवलकं प्रति हे धार्मिक स्वर्गं गंतुकामेन त्वया प्रतिदिनं करंजकशाखा भज्यन्ते तत् कथमद्यापि तव पादौ धरणीमेव स्पृशतः- एतादृशस्यापि पादौ धरण्यां कथं तिष्टत इत्यनेन - हे पापकारिन्, त्वया धर्मबद्धा कृतेन एतद्व्यापारेण स्वर्गो न लभ्यते अपित्वधोगतिरेवेत्याक्षिपतीत्यभिप्रायः । विशेषोक्तिरलंकारः। शिवपूजार्थं करंजभंजने सत्यपि स्वर्गगमनरूपस्य कार्यस्यानुत्पत्तेः । अत्र वाक्यप्रकाश्यसंलक्ष्यक्रमसंकीर्णो भावध्वनिः, धार्मिकादिपदव्यंग्यानुगृहीमर्षस्य प्रतीतेः ।।४२।।

In Public domain. Digitization Muthulakshmi Research Academy

कस्याश्चिदसत्यानिर्वेदोक्तिः

वंकको पुलइंच्छइकं सकहिंजल सुहंव दुखंव ।
केण समं वहसिं जल पामर बहले हअंगामे ।। ४३

वक्रं को दृश्यते कस्मै कथ्यते सुखं वा दुःखं वा ।
केन समं प्रहस्यते पामर बहुले हतग्रामे ।।

व्या - काचिद्विदग्धा पूर्वं स्वच्छंदचारिणी ग्रामांतरं गता कयाचिदसत्या कुशलं पृष्टा । पामरबहुले अस्मिन् ग्रामे वक्रविलोकनानि को जानाति । सुखं वा दुःखं वा निवेदयितुं कोऽवार्हः। केन समं नर्महासः क्रियते इत्यनेन साभिलाषत्वं सूचकानवगतेः वक्र दर्शदानाद्यनुभावानां विफलत्वेन निर्वेदं प्राप्ता कथंकारमत्रास्माकं कुशलमिति तां प्रत्युक्तवतीत्यभिप्रायः । हेतुरलंकारः। अत्र वाक्यगत प्रकाश्या संलक्ष्यक्रमो भावध्वनिः निर्वेदस्य प्रतीतेः ।।४३।।

काचित् प्रातिवेशिकमाह

बहुलत माहअ राई अंजव उंधोव ईघरं सुणं ।
तह जंगासु सअंचिअ जह अंह्मण अमुसिंजामो ।। ४४

बहुलत माहत रात्रिरद्य प्रोषितपर्तिगृहं शून्यम्
तथा जागृहि प्रातिवेशिक यथा वयं न मुष्यामहे ।।

व्य - अत्र काचिद् जनसमक्षं अद्य महत्यंन्धकारे शून्ये गृहे चौरैरहं यथा नमुष्ये तथा मां प्रतिपालय इत्यनेन प्रार्थनाव्याजेन, अहमेकाकिनी त्वया समागन्तव्यमिति विधे प्रतीतेः ।।४४।।

कस्याश्चिदसत्यानिर्वेदोक्तिः

वडजंघोजो अतहदिंणो सीसंमि सहजू आणेहि ।
तञ्चि अणह्लीं पणमामिह अजरेहो सुसंतूठा ।। ४५

वटयक्षो यश्च तथा दत्तश्शीर्षे सह युवाभिः ।
तमेवेदानीं प्रणमामि हतजरे भव संतुष्टा ।।

व्या - अत्र काचिदसञ्चरती पूर्वं यौवनमदात् वटस्याधः स्थिते यक्षागारे यां यक्षप्रतिमां उपधानीकृत्य युवाभिस्समं बहुलकालं सुरतसुखान्यनुभूय इदानीं विगळितयौवनमदा तामेव दैवमिति पूजयामि हे जरे संतुष्टाभवेत्यनेन त्वयाहमेतादृशीमवस्थां प्राप्तेति निर्वेदात् तामुपालभत इत्यभिप्रायः, अत्र असंलक्ष्यक्रमो भावध्वनिः निर्वेदस्य प्रतीतेः ।।४७।।

नायिका सखीमाह

दुःखं दन्तोवि सुहं जणेल जोजंसवंलहो होल ।
दलअणहदूमिआणवि वंठल धणणारोमञ्चो ।। ४६

दुःखं दददपि सुखं जनयति यो यस्य वल्लभो भवति ।
दयितनखदुःखितयोरपि वर्तते स्तनयोरोमाञ्चः ।।

व्या - अत्र सखीभिः प्रियतमापराधान् संसूच्य तवायं दुःखकारीमानः क्रियतामिति बोधिता काचित्तस्मिन्ननुरागातिशयात् विरहमसहमाना तां प्रति दुःखं दददपि वल्लभसुखं जनयति, यथा दयितनखव्रणपरिदूनयोरपि स्तनयोः हर्षेण रोमाञ्चो भवतीत्यनेन किंचिद्दुःखेपि सुखातिशयस्य विद्यमानत्वात् तं विरहय्य क्षणमपि स्थातुं न शक्नोमि । इति स्वानुरागं प्रकटितवतीत्यभिप्रायः। अत्र निदर्शनालंकारः । अत्रार्थंतरप्रवृत्तेन किंचित् तत् सदृशं फलं सदसद्वा निदर्श्येत यदि तत्स्यान्निदर्शनमिति उक्तत्वात् अत्र असंलक्ष्यक्रमो भावध्वनिः अनुरागस्य प्रतीतेः ।।४६।।

दूती नायकमाह

बहुसोपिक हिंजंतंतूहवऽणं मंझहंथ संदिंठं ।
णसु अन्तिजं चाणा वुणरुंतन अंकुणल अंजा ।। ४७

बहुशोपि कथ्यमानं तव वचनम् मम हस्तसंदिष्टं ।
न श्रुतमिति जल्पन्ती पुनरुक्तशतं कारयति वधूः ।।

व्या - अत्र काचित् चतुरा नायिकानुरागपरिज्ञानाय प्रेषिता प्रत्यागत्य

In Public domain. Digitization Muthulakshmi Research Academy
नायकं प्रति तव संदेशं मन्मुखात् बहुशः श्रुत्वापि पुनः पुनस्संभ्रमकुतूहलेन न श्रुतमिति मां पुनरुक्तशतं कारयतीत्यनेन तस्याः त्वयि महाननुराग इति सूचितवतीत्यभिप्रायः । अत्र असंलक्ष्यक्रमो भावध्वनिः अनुरागस्य प्रतीतेः।।४७।।

काचित् सतीमाह

तह सुणाए पुलल उदरवली आवगतार आवहिद ।
जहवारिदवि घरसा मिण्णदलम्बा एवसलम् ॥ ४८

तथा स्नुषायावलोकितः दरवलितापांगतारकं पथिकः ।
यथापरितो गृहस्वामिना अवलंबते वसतिम् ॥

व्या - अत्र गृहपतिना वारितोपि यथा गृहे वसतिमालंभते तथावलोकित इत्यनेन एषा श्वशुरादि सन्निधौ तेन सह सल्लापं कर्तुमशक्ता कटाक्षवीक्षणैरेव स्वाभिप्रायं सकलमस्मै निवेदयति पश्येति काचिदसती माहेत्यभिप्रायः अत्र-असंलक्ष्यक्रमो संकीर्णो भावध्वनिः, उभयोरनुरागप्रतीतेः ।।४८।।

काचिदसती सहचरीमाह

अहअंह्मा गओ कुलघराल अंजेतिचिंचरो जारम् ।
सहसा गग अंसवलणो तुरी अंकण्ठंमिलागअल ॥ ४९

असावस्माकमागतः कुलगृहादद्येत्यसतिजारम् ।
सहसागतस्य पत्युस्त्वरितं कण्ठे लगयति ॥

व्या - सहसा अतर्कितम् - अतर्किते तु सहसा इत्यमरः । अत्र काचि दसती स्वैरमुपपतिना सह वर्तमाना सहसा पत्यौ गृहमागते सति असावस्माकं कुलगृहादागतः त्वयैष परिष्वज्यतामिति पतिकण्ठे लगयतीत्यनेन प्रत्युत्पन्नमति स्त्रीभिः को वा न वंच्यते, कुलटाकपटं केन वा वेदितुं शक्यते पश्येति सखीमाहेत्यभिप्रायः । अत्र स्वतस्सिध्दार्थशक्तिमूलोलंकारेण वस्तुध्वनिः युक्त्या तद्वचनस्य प्रतीतेः ।।४९।।

In Public domain. Digitization Muthulakshmi Research Academy

काचिन्नायकमुपालभते

अवरंजसुलीसं संवंतुहसुह अविसहिमू अह्मो ।
गुणणिं भरं मिहि अएजाणसु सुदोसाणमअन्ति ।। ५०

अपराध्य विस्रब्धं सर्वं तव सुभग विषहामये ।
वयं गुणनिर्भरे जानीहि दोषा न मान्ति ।।

व्या - काचित् प्रगल्भा नायिका मुहुर्मुहुरपराधिनं नायकं प्रति विस्रब्धमपराधान् कुरु, त्वया यत् कृतं तत् सर्वं मया सह्यते यतस्तव गुणपूर्णे मम हृदये दोषाणामवकाशो नास्तीत्यनेन विपरीतलक्षणया, हेदुर्भग तव कश्चिदपि गुणो नास्ति । अतशोपराधाः क्रियन्ते, सह्यत इति रोषात् तं भर्त्सितवतीत्यभिप्रायः । अत्र लक्षणामूलो वाक्यप्रकाश्योत्यन्ततिरस्कृता विवक्षितवाक्यध्वनिः, अनेन तद्दर्शनस्य प्रतीतेः ।।५०।।

काचित् सहचरमाह

रणरण असुंण हिअओचितं को विरहदुंबलं लाअम् ।
अगणिअवसंलंवि अवोजवीणो गाममंझेण ।। ५१

रणरणकशून्य हृदयश्चिन्तेयन् विरहदुर्बलां जायाम् ।
अगणितनिजवसतिरेवा चत्रांतो ग्राममध्येन ।।

व्या - एष देशान्तरादात्मग्राममासाद्य विरहदुर्बला जाया कीदृशीमवस्थां प्राप्तेति चिन्तारणरणकशून्यहृदयः अस्यां वीथ्यां अत्मीयमागारमिति विस्मरन् मोहात् ग्राममध्येन निर्यतइत्यनेन सखे अनुरागातिशयेन अयमेतादृशविशेषं प्राप्तः पश्येति काश्चित् सहचरमाहेत्यभिप्रायः । अत्र वाक्यगत असंलक्ष्यक्रमो रसध्वनिः प्रवासविप्रलंबस्य प्रतीतेः ।।५१।।

नायिका सखीमाह

कइ यम वरहिअं वेंमं णंछिं चि अमामिमाणुसेलोए ।
जलहोलकंस विरहं होंसइ विरहं मिकोजिबल ।। ५२

In Public domain, Digitization Muthulakshmi Research Academy

कैतव विरहितं प्रेम नास्त्येव सखि मानुषे लोके ।
यदि भवति कस्य विरहो भवति न विरहे को जीवति ।।

व्या - अत्र काचित् स्वाधीनपतिका पत्यै निरतिशय प्रेमानुबद्धा विरहे क्षणमपि न शक्यं जीवितुमिति मन्वाना तस्मिन् प्रोषिते प्राणान् धारयन्ती सख्याः पुरस्तात् हे सखि मानुषे लोके निष्कैतवं प्रेम नास्त्येव, यद्यस्ति कस्य विरहः, यथाकथंचित् विरहे सति केन वा जीव्यत इत्यनेन, मया विरहः सह्यते जीवितमपि धार्यते मम प्रेम सकैतवमित्यात्मानमुपालभत इत्यभिप्रायः । हेतुरलंकारः । निष्कैतवप्रेम्णोः विरहाभावनिमित्तत्वात्, अत्र वाक्यप्रकाश्यो संलक्ष्यक्रमो भावध्वनिः निर्वेदस्य प्रतीतेः ।।५२।।

नायिका नायकमाह

दंयिंण एंण एन्तो सुहअ सुहावेशि अह्मगे हालम् ।
णिंकल अवेणं जाणं गओसि काणिं पुरंताणम् ।। ५३

दाक्षिण्येन यत् सुभग, सुखयत्यस्माकं गृहाणि ।
नैष्कैतवेन यासां गतोसि का निर्वृत्तिस्तासाम् ।।

व्या - यत्र काचित् प्रगल्भा धीरा नायिका यथा कथंचित् गृहमागतं नायकं प्रति हे सुभग, दाक्षिण्येन अस्माकं सुखयसि, सहजप्रेम्णा यासां गृहाणि गच्छसि तासां कीदृशम् सुखमित्यनेन तव यत्राभिरतिः तत्रैव स्थातव्यं किमर्थमस्मान् खेदयितुमागच्छसीति तमाक्षिपतीत्यभिप्रायः। अत्र वाक्यप्रतिवाक्यात्यन्ततिरस्कृता विवक्षितवाच्यो ध्वनिः अनेन तद्भर्त्सनस्य प्रतीतेः ।।५३।।

काचिदसती देवलकमुपालभते

एं दहमेंतं गामे णवऽल भिंखेन्ति कीसमंभणसि ।
धं मियकरंज भंजय जीवसि तंविदे बहुअम् ।। ५४

एतावन्मात्रे ग्रामे नवतति भिक्षेति कस्मान् मां भणसि ।
धार्मिक करंजभंजक यज्ञीवसि तदपिते बहुयत्र ।।

In Public domain. Digitization Muthulakshmi Research Academy

व्या - काचित् कुलटा महत्यपि ग्रामे काचिदपि भिक्षां न ददातीति खिद्यमानं देवलं प्रति विपरीतलक्षणया तमपकारिणं धार्मिकेति संबोध्य अस्मिन् ग्राम - इत्यादिना सर्वासामस्माकं संकेतभूतकरंजभंजनापराधेन दण्ड्यस्य कुतो भिक्षेति तं भर्त्सितवतीत्यभिप्रायः । अत्र पदप्रकाश्य स्वतस्सिद्धार्थशक्तिमूलो संकीर्णो वस्तुना वस्तुध्वनिः । धार्मिकपदप्रकाश्य व्यंग्यस्यानुगृहीतत्वात्।।५४।।

काचित् सहचरीमाह

सिहिणे जहुणावअंसावहूआ वाहसंगं विभमल ।
अमोन्तिअ गहिअवसाहणा णमत्सेवंतीणं ।। ५५

शिखिबर्हावतंसा वधूर्व्याधस्य गर्विता भ्रमति ।
गजमौक्तिकगृहीतप्रसाधनानां मध्ये सपत्नीनाम् ।।

व्या - जो हुणेति बर्हि वाची देश्यः झासादिषु पठितः । अत्र व्याधस्य वधू गजमौक्तिक गृहीतमण्डनानां सपत्नीनां मध्ये बहीवतंसा गर्विता भ्रमतीत्यनेन पतिः मय्यासक्ततया निरंतरसुरतखिन्नः मौक्तिकार्थं गजान् व्यापादयितुमसमर्थस्सन् मम बर्हमेवावतंसी कृतवान् युष्मास्वानुराग-भावादखिन्नतया गजान् व्यापाद्य मौक्तिकानि युष्मभ्यं दत्तवानिति स्वसौभाग्येन गर्विता भ्रमति पश्येति सहचरीमाहेत्यभिप्रायः । अत्र गुणीभूत व्यंग्ययोस्संसृष्टिः। बर्हावतंसगजमौक्तिकयोः व्याच्यसिद्धयंगयोः संसर्गात् ।।५५।।

नायिका नायकमुपालभते

पंचंखमंतु आं अंजलचुंबसि महलमे हयकपोले ।
तामं झापि असहिए विसेन ओकीसतंणाओ ।। ५६

प्रत्यक्षमंतुकारक यदि चुंबसि मम इमौ हतकपोलौ ।
तस्मान् मम प्रियसख्या विशेषकः कस्मादार्द्रः ।।

व्या - तंणाअशब्द आर्द्रवाची वरूक्तादिषु पठितः । अत्र काचिन्नायिका स्वकपोल प्रतिबिंबितं सखीमुखं चुंबंतं नायकं प्रति हे प्रत्यक्षापराधकारक, यत्राभिरतिस्तत्रैव स्थातव्यं किमस्मान् खेदयितुमागच्छसीति

In Public domain. Digitization Muthulakshmi Research Academy
तमाक्षिपतीत्यभिप्रायः । अपराधकारक इति इमौ कपोलौ चुंबसि यदि तर्हि प्रियसख्यास्तिलकः कस्मादार्द्र इत्यनेन शठत्वया मत्कपोलचुंबनव्याजेन प्रतिबिंबितं सखीमुखं चुम्ब्यते नोचेत् कथं तस्यास्सात्त्विकोदय इति तमाक्षिपतीत्यभिप्रायः ।

अत्र स्वतस्सिध्दार्थशक्तिमूलो अलंकारेण संसृष्टो वस्तुध्वनिः तिलकार्द्रतानुमानस्य सखीमुखचुम्बनस्य हतपदप्रकाश्येन कपोलचुंबनेन सह संसर्गात् ।।५६।।

कस्याश्चिदसत्यवचनम्

तंसअसोहंग गुणंअमहिलासअंअसाहसंमंझ ।
जाणलगो आऊरो परिसा अलंधरंतोअं ।। ५७

तस्य च सौभाग्यगुणंअमहिला सदृशं च साहसं मम ।
जानाति गोदापूरो वर्षाकालार्धरात्रश्च ।।

व्या - अत्र काचिदसच्चरिता सख्याः पुरस्तात् उद्दामयौवनाहमुपारूढ़ मन्मधावेशा तत् सौभाग्यगुणेनाकृष्टमहासाहसिकी गर्जत् घनांधकारभयंकरेषु अर्धरात्रेषु महान्तमुभयकूलंकषं गोदावरीपूरमुत्तीर्य तत्र तेन समं सुखान्यनुभूय पुनरप्यागच्छामि । अत्र मम साहसस्य च तत् सौभाग्यस्य च गोदावरीपूरो वर्षार्धरात्रश्च साक्षिणाविति स्ववृत्तन्तकथनेन साहसकरणाय तां प्रोत्साहितवतीत्यभिप्रायः । अत्र स्वतःसिध्दार्थशक्तिमूलो वस्तुना वस्तुध्वनिः । अत्र प्रोत्साहनस्य गम्यमानत्वात् ।।५७।।

काचिद्देवलमाह

भमधंमि अविधंसंसोसुण ओअंजमारि ओदेण ।
गोआतड उभविडयकुडुंभवासिणा दरिअसिएण ।। ५८

भ्रम धार्मिक विस्रब्धं सशुनकोऽद्य मारितस्ते नः ।
गोदातटविकटकुटुंभे वासिना दृप्तसिंहेन ।।

In Public domain. Digitization Muthulakshmi Research Academy

व्या - दरिअ इत्यत्र दृप्तं दीप्तोति दृप्तशब्दे पकारचकाराभ्यां सहकारस्य अदीत्ययमादेशो भवति यत्र काचित् कुलटाभिक्षार्थिनं शुनकभयात्र गृहं प्रवेष्टुमक्षमं देवलकं प्रति हे धार्मिक अद्य सशुनकः गोदावरीतटनिकुंजवाटीषु संचरंतं देवलकं तत्र सिंहोस्तीति भयमुत्पाद्य तत् संचारं निवारितवतीत्यभिप्रायः- अत्र हेतुरलंकारः । शुनकमारणस्य विस्रब्ध संचार हेतुत्वात् । अत्र स्वतस्सिध्दार्धशक्तिमूलो वाक्यप्रकाश्याविधिरूपेण वस्तुना निषेधरूपो वस्तुध्वनिः विस्रब्धं भ्रमेति विधिना तत्र न संचरितव्यमिति निषेधस्य प्रतीतेः ।।५८।।

काचित् सहचरीमाह

पल पुरओं चिअ णिंजिल विंचिअ दंठेति जारवें जघरम् ।
सहिअअ सहिअण पसरिअ करजुअलंसोलणीअंज ।।५९

पति पुरत एव नीयते वृश्चिकदष्टेति जारवैद्यगृहम् ।
सहृदयसखीजनप्रासारितकरयुगलान्दोलनी अद्य ।।

व्या - अत्र काचिदसच्चरिता उपपतिना अनुरागपरीक्षार्थं पतिसमक्षमेव त्वया मद्गृहमागन्तव्यमिति नियोजिता सती वृश्चिकदष्टास्मीति सखीभिरूह्यमाना पत्युः पश्यत एव जारवैद्यगृहं नीयत इत्यनेन अस्यां वंचनाचातुरीं पश्येति काचित् सहचरीमाहेत्यभिप्रायः। अत्रस्वतस्सिद्धार्थशक्तिमूलोऽलंकारेण वस्तुध्वनिः युक्त्या वञ्चना चातुर्यस्य प्रतीतेः ।।५९।।

काचित् सहचरमाह

सेओंलिअ संवंगीणामं गहणेणतं सुसहअंस ।
दूलं अंवाहन्ती तंस संचिऽघरंगणंपंता ।। ६०

स्वेदार्द्रीकृतसर्वाङ्गी नामग्रहणेन तस्य सुभगस्य ।
दूतीं संदिश्यन्ती तस्यैव गृहांगणं प्राप्ता ।।

व्या - अंपाहंतीति संदिशप्पाह इत्यप्पादेशः । अत्र काचित् प्रियमानेतुं दूतीं संदिश्य तन्नामधेयग्रहणात् स्वेदार्द्रिताङ्गी तस्यां प्रस्थितायां तामनुसृत्य

In Public domain. Digitization Muthulakshmi Research Academy

पुनः पुनः संदेशशेषं कथयन्ती रसातिशयात् अविदितसंचारितपदा तस्य गृहांगणं प्राप्तेत्यनेन अनुरागं पश्येति कश्चिदाहेत्यभिप्रायः । अत्र वाक्यप्रकाश्योसंलक्ष्यक्रमो भावध्वनिः औत्सुक्यस्य प्रतीतेः ।।६०।।

वेश्या दुहितरमाह

मवंचसुखी संभंलमाण बहुचाटुसुकं मणिपुणाण ।
णिंवंतिअकंजपरंमुहाण सुणआणव खलाण ।। ६१

मा व्रज विस्रब्धमेषां बहुचाटुकर्मनिपुणानाम् ।
निर्वर्तितकार्यपराङ्मुखानां शुनकानामिव खलनाम् ।।

व्या - वंचसु इत्यत्र च नुतमधस्सृजामिति व्रजेरित्यस्य चकारादेशः । अत्र काचिद् वेश्या माता दुहितरं प्रति तत् संभोगलोलुपतया प्रथमं बहुचाटुकर्म निपुणानां संभोगे निवर्तिते सति शुनकानां पराङ्मुखानां विश्वासं माव्रजेत्यनेन पूर्वमेव त्वया तेभ्यो धनं गृहीतव्यं पश्चात् न ददातीति कथितवतीत्यभिप्रायः। अत्र उपमालंकारः । स्वतस्सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः अनेन प्रथममेव धनं गृहितव्यमिति वस्तुनः प्रतीतेः ।।६१।।

नायिका सखीमाह

भुवि उ घी ए पुंलोलं संणिंभं चं सं परं मुहीहोंसं ।
जंभणहतं करिंसं सहिओजल तंणवेंखिसं ।। ६२

भ्रुकुट्या विलोकयिष्यमि निर्भर्त्सयिष्यामि परङ्मुखी भविष्यामि ।
यद्भणति तत्करिष्यामि हे सख्योदयितं न द्रक्ष्यामि ।।

व्या - अत्र काचिद् मुग्धा नायिका सखीभिर्मानकरणाय बोधिता ताः प्रति हे सख्यः अपराधिनं प्रियमुद्दिश्य भवद्भिरुपदिष्टं भ्रूकुटी विलोकनादिकं करिष्यामि यदि तं न द्रक्ष्यामीत्यनेन तस्मिन्न दृष्टे अहमात्मनः प्रभवामि - दृष्टे पुनः तत्परवशा न प्रभवामीति स्वानुरागं प्रकटितवतीत्यभिप्रायः । अत्र वाक्यप्रकाश्यो संलक्ष्यक्रमो भावध्वनिः अनुरागातिशयस्य प्रतीतेः ।।६२।।

काचित् सहचरीमाह

ओ सरल धुणल साहं भंभामु हलो पुणो स्मंलयअल ।
जंबूफलं णगह्लल भमरोन्तिक ई पुडमदन्को ।। ६३

अपसरति धुनोति शाखां भंभामु खरः
(भंभेत्यनुकरणं) पुनस्समाश्रयति ।
जंबूफलं न गृह्णाति भ्रमर इति कविः (पि) प्रथमदष्टः।।

न शक्त मुक्तदृष्ट मृत्परिगणेष्वित्ति दृष्टशब्दे संयुक्तस्य का देशः - दंभ धरेत्यादिना थस्य सादेशः -

व्या - अत्र काचित् प्रातिवेशिकी सहचरीं प्रति कपिचेष्टितकथनव्याजेन एष पूर्वं परदारसंगतस्तत्पतिना ताडितः । तथाप्यनुरागातिशयादिदानीमपि तद्गृहं प्रवेष्टुकामः तत्र तामेव दृष्ट्वा अन्यशंकया उपसर्तुमक्षमस्सन् अपसरति। तदेतज्ज्ञापनार्थं यत्किंचित् चापलयति कासादिशब्दंकरे अयन्त इति भर्त्सनवचनाभावाच्चोपसरति सहसा न प्रविशति पश्येत्यभिप्रायः। अत्र स्वतस्सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः । कपिचेष्टितकथनेन तच्चेष्टितस्य प्रतीतेः ।।६३।।

प्रोषितभर्तृकाया वचनम्

कंतो खेमंतु तोजो सोखुंजंब ओघरं दारे ।
तं सकीलमंथ ओवरिकोवि अणंथो समुंपंणो ।। ६४

कुतः क्षेमं कुतयतः सकुब्जाम्रो गृहद्वारे ।
तस्य किल मस्तको परिकोप्यनर्दः समुत्पन्नः ।।

व्या - अत्र काचित् प्रोषितभर्तृका कयाचित् कुशलं पृष्टा तां प्रति मम क्षेमं कुतः कुतः - निर्वेदातिशयात् द्विरुक्तिः - मम गृहांगणे यो सौ कुब्जाम्रस्तस्य (मस्तकोपरि) शिरसि कोप्यनर्थ इति मंजरीमेनां दृष्ट्वा जीवामीत्यभिप्रायः ।अत्र गूढं नाम गुणीभूतव्यंग्ये प्रतीयमानस्य वाच्यायमानत्वात्।।६४।।

In Public domain. Digitization Muthulakshmi Research Academy
काचित् प्रातिवेशिकी सखीमाह

भंतंति णतिणालं सिविउं दिणाल जाल वहिअम् ।
सतालं चेअ वहाए असई अअंटसल रु अन्ति ॥ ६५

भर्त्सयंत्या तृणानि स्वपितुं दत्तानि यानि पथिकस्य ।
तान्येव प्रभाते असती आकर्षति रुदती ॥

व्या - अत्र काचित् प्रातिवेशिकीयमानया कुलटया रात्रौ आगतेन पथिकेन शयनार्थं तृणानि याचितया तं विलोक्य साभिलाषया गृहजनवंचनार्थं वृथा भर्त्सयन्त्या यानि तृणानि दत्तानि सेयं प्रभाते तान्येव तृणानि रुदत्याकर्षतीत्यनेन एषु तृणेषु अहं तेन सह विविधानि सुखान्यनुभूय एतादृशानि कथं त्यजेयमिति रुदती कर्षति पश्येति सखीमाहेत्यभिप्रायः । अत्र संलक्ष्यक्रमः संसृष्टो भावध्वनिः भर्त्सयन्तीति रुदती कर्षतीति च पदप्रकाश्ययोरवहित्था विषादयो संसृष्टत्वात् ॥६५॥

कस्याश्चिदसत्यावचनम्

अलविविहालं जलकुम्भंखे तृणसमाग अंह्मि सहितुरिअं ।
समसेऽसलिलणी सासणीसहा वीसमामिखणं ॥ ६६

अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखी त्वरितम् ।
श्रमस्वेदसलिलनिश्वास निस्सहा विश्रमामि क्षणम् ॥

व्या - अत्र काचित् जलाहरणाय नदीं गत्वा तत्र केनचिदुपपतिनानुभूत-संभोगजनितश्रमस्वेदातिशययुक्ता गृहमागत्य कयाचित् प्रातिवेशिन्या जलानयनार्थमाहूयमाना तां प्रति अतिपृथुलमित्यादिना संभोगजनितं स्वकीय श्रमादिकमन्यथा शंकिभ्यः श्वश्रयादिभ्यो जलकुम्भाहरकृतं न चौर्यरत कृतमिति निवेदयतीत्यभिप्रायः । अत्र स्वतस्सिध्दार्थशक्तिमूलोलंकारेण वस्तुध्वनिः हेतुना चौर्यरतप्रच्छादनस्य प्रतीतेः ॥६६

कस्याश्चिदसत्याजरत्यावचनम्

केसा पंडुरच्चा आ असई संगणचं मजंजरिअम् ।
चिन्तं तुहसोभंगं गोदादूलंतणंकुणल ॥ ६७

In Public domain. Digitization Muthulakshmi Research Academy

केशाः पांडुरच्छाया असती संगेन चर्मजर्जरितम् ।
चित्रं तव सौभाग्यं गोदादूतीत्वं करोति ।।

व्या - अत्र केनचित् पतिना प्रकाशं पुष्पाणि दातुमक्षमेण गोदावरी पूर्वगांगं गत्वा पत्रपुटे निक्षिप्य वा प्रवाहे त्यक्तानि गोदावर्या समानीतानि पुष्पाणि गृह्णंती काञ्चिदसतीं प्रति काचित् जरती अहं एवं विधा यत्र कुत्रापि न दृष्टमीदृशं तव सौभाग्यम् । चित्रं गोदादूत्यं करोतीत्यनेन मया ज्ञातं त्वच्चरितमिति तां निवेदितवतीत्यभिप्रायः । अत्र कविप्रौढ़ोक्ति सिद्धार्थ शक्तिमूलो वस्तुना वस्तुध्वनिः अनेन तद्गूढ़सच्चरितस्य प्रतीतेः ।।६७

नायिका दूतीमुपालभते

णि णिंदं दोंबलं चीता अलसंतणं सणीससि ।
अ महं मंदभा इणी एकएस हितुमं वि अहह परिभवइ ।।६८

निर्निद्रं दौर्बल्यचिन्ता अलसत्वं सनिश्वसितम् ।
मम मंदभागिन्याः कृते सखि त्वामपि अहह परिभवति ।।

व्या - अत्र काचिन्नायिका सखीं प्रति हे सखि मंदभागिन्याः मम कृते प्रियमानेतुं गतागतानि कुर्वन्ती त्वां निर्णिद्रित्यादिना एते भावाः अत्र स्वतस्सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः । मंदभागिन्या इति पदस्य अर्थेन दूत्यास्तत्रासक्तिप्रतीतेः ।।६८।।

नायिकोक्तिः

उंजूअ रए णतुसल वंकमि वि आसअं विअंबेल ।
एंगअ भंवाएमहि विअंकहंणु कादंवं ।। ६९

ऋज्जुरते न तुष्यति वक्रोप्याशयं विकल्पयति ।
अत्राभव्यया मया प्रिये प्रियं कथं नु कर्तव्यम् ।।

व्या - अत्र काचिन्नायिका सखीभिः तव प्रेयान् अन्यत्रासक्तः त्वया किमिति नावर्ज्यत इति पृष्टा ताः प्रति ऋज्जुरत इत्यादिना वाक्यकदम्बकेन तं

In Public domain. Digitization Muthulakshmi Research Academy
कथमावर्जयामीति स्वविषादं प्रकटितवतीत्यभिप्रायः । अत्र वाक्यप्रकाश्यो संलक्ष्यक्रमो भावध्वनिः विषादस्य प्रतीतेः ॥७०॥

काचिदसञ्जरती प्रथमकुलटां बोधयति

अन्धंछिपेच्छि अं माकरे सुसाहं वि अंपुलो एसु ।
सोविसु दिंठोखु भवे तूमं वि मुन्दा कलिंजिहिसि ॥ ७०

अर्धाक्षि प्रेक्षितं मा कुरुष्व स्वाभाविकमवलोकय ।
सोपि सुदृष्टः खलु भवेत् त्वमपि मुग्धा करिष्यसे ॥

व्या - अत्र कञ्चिदपि सु रूपं युवानं इतरजनभया दर्धविलोकनेन साभिलाषं पश्यन्तीं नवकुलटां प्रति काचिदसञ्जरती शंकास्पदमर्धविलोकनं न कर्तव्यं स्वभाविकमेव विलोकयेति तत्र फलं दर्शयित्वा तामेव कुर्वतीत्यभिप्रायः। अत्र गूढ़कं नाम गुणीभूतव्यंग्यम् । प्रतीयमानस्य उपदेशस्य वाच्यायमानत्वात् ॥७०॥

काचित् कृतगोत्रस्खलितम् नायकमुपालभते

कहसा सोभंगगुणं ओ एम् समंवहल संचिणतु मा ए ।
जा एहरिंजलणं महरि ऊण विदिज्ज एमंझ ॥ ७१

कथं सा सौभाग्यगुणं मया समं वहति सघृण त्वया ।
यस्याहृदय ते नाम त्वा विद्रायते मह्यम् ॥

व्या - संघिणेत्यत्र सेवति समासे विकल्पेन द्वित्वं । अत्र काचिन्नायिका अन्यकान्तासक्तेन नायकेन तन्नामग्रहमाकारिता तं प्रति हे सघृण, मयि दयापर त्वया यस्यानाम हृत्वा मह्यं दीयते सा कथं मत्सदृशीति वक्रोक्त्या निर्घृण, तामेव सदा हृदये वहसि, पुरः स्थितानामपि माम् न जानासि त्वां दिग् इति तमुपालभते इत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलो संकीर्णो वस्तुना वस्तुध्वनिः । सघृणपदप्रकाश्येन तदुपालंभस्यानुगृहीतत्वात् ॥७१॥

In Public domain. Digitization Muthulakshmi Research Academy

दूती नायकमाह

उञ्जागर कसालअगदुअछीमोह मन्डनविलख ।
लञ्जुल लञ्जाखुलणीसा सुहअसहीण विरहाई ।। ७२

उज्ञागर कषायित गुर्वक्षे मोघमन्डनविलक्षा ।
लज्ञते लज्जावती सा सुभग सखीनामपि वराकी ।।

व्या - अत्र प्रथमं वासकसज्ञिकायाः प्रिये चिरायति पश्चात् विरहोत्कंठितायाः नायिकाया दूती नायकं प्रति त्वया वंचिता समदुःखस्य सखीजनस्यापि सकाशाल्लजत इत्यनेन तत् कृतादपिनवात् महतः पराभवादितःपरं कां दशां प्राप्नुयात् तत् त्वया सत्वरमागत्य संभावनीयेति तं प्रोत्साहितवतीत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलवस्तुना वस्तुध्वनिः । अनेन नायिकायाः अनर्थागमरूपवस्तुनः प्रतीतेः ।।७२।।

काचिद्विदग्धा सखीमाह

गोलाविसमो आरंच्छलेण अंवा उरंमिसेमुक्तो ।
अणुअंपाणिं दोसं तेण विसा गाढ़मुपगूढ ।। ७३

गोदाविषमावतारच्छलेन आत्मा उरस्यस्य मुक्तः ।
अनुकंपानि दोषं केनापि सागाढमुपगूढा ।।

व्या - अत्र एषाकामुकी तं विलोक्यानुरागातिशयात् विषमावतार स्खलनव्याजेन तस्मिन्निपतति एषोप्यनुकंपया गृह्णन्निव तामालिङ्गतीत्यनेन एतौ युवानौ सर्वेषां पश्यतामेव परस्परमालिङ्गनमाचरतः अनयोः कपटचरितं पश्येति काचित् कामप्याहेत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलोलंकरेण वस्तुनालंकारध्वनिः। अन्योन्यालंकारेण सर्वजनवंचनारूपस्य वस्तुनः प्रतीयमानत्वात् ।।७३।।

काचिदसती यूनः श्रावयति

जलविखु दंलं दुलि आतहवि अमावुन्ति णिङ्गआ भमसु ।
छे आगामजुवाणोमा अण्दु आए अणुमन्ति ।। ७४

In Public domain. Digitization Muthulakshmi Research Academy
यद्यपि खलु बाला तथापि च मा पुत्रिनग्निका भ्रम ।
भेकाग्राम युवानो मातरं दुहितानुमान्ति ।।

व्या - अत्र काचिदसती स्वदुहितरं प्रति यद्यपि त्वं बाला तथापि विपसनामाभ्रम ! विदग्धा ग्राम युवानो दुहित्रा मातरमनुमांतीति दुहितुर् या यथा मदनमन्दिरं तथैव मातुरपीति निश्चिन्वतीत्यनेन वा दूतीवृत्त्या स्वकीयस्य मदनमन्दिरस्य मनोहरतां व्यंजयन्ती तान् प्रोत्साहयतीत्यभिप्रायः । अत्र स्वतस्सिध्दार्थशक्तिमूलोलंकारेण वस्तुध्वनिः । अनुमानालंकारेण तत् प्रोत्साहनरूपस्य वस्तुनः प्रतीतेः ।।७४।।

काचिदसतीमाह

मोहविंजविअ पईवं णिरुंधणीसास संकिलंलासं ।
सवहसअ रंखिओंठं चोरिअरणं सुहावेला ।। ७५

मुखनिर्वापितप्रदीपं निरुद्धनिश्वासशंकितोल्लासम् ।
सशपथशतरक्षितोष्ठं चोरितरतं सुखयति ।।

व्या - अत्र काचिदसती केनचित् प्रेषिता चोरितवर्णनेन त्वयापि तत्र प्रवर्तितव्यमिति सखीं प्रोत्साहयतीत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः अनेन तत् प्रोत्साहनस्य प्रतीतेः ।।७५।।

काचिदसती गृहमागतं पथिकमाह -

पन्थऽणएध संधरमंठिमणं पन्थरयने गामे ।
उंणाअ वओहरावें खिऊण जलवससितावससु ।। ७६

पान्थ नात्र संस्तरमस्ति मनाक् प्रस्तरस्थले ग्रामे ।
उन्नतपयोधरान् दृष्ट्वा यदि वससि तस्माद्वस ।।

व्या - उन्नतपयोधरान् उन्नतमेघान् उन्नतस्तनौ च, अत्र काचिदसच्चरिता विदग्धा हालिकवधू सायंन्तनसमये गृहमागत्य शयनार्थं संस्तरं याचमानं कमप्यभिरूपपथिकं युवानं प्रति साभिलाषापि निरभिलाषेव गृहजनवंचनार्थं

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तरस्थले ग्रामे मनागपि संस्तरं नास्तीति प्रतिकूलं ब्रुवाणा उन्नतपयोधरौ दृष्ट्वा यदि वससि तस्माद्वसेत्यनेन, उन्नतस्तनमंडलं दृष्ट्वा यद्युपभोगापेक्षाऽस्ति तर्हि तिष्ठेति निवासाय तं प्रोत्साहयतीत्यभिप्रायः । अत्र शब्दशक्तिमूलो वस्तुध्वनिः । अनेन तत् प्रोत्साहनस्य गम्यमानत्वात् - स्तनमंडलं दृष्ट्वा रिरंसुश्चेत्तिष्ठेति वस्तुनः प्रतीतेः ।।७६।।

कस्याश्चिन्निर्वेदोक्तिः

वंक भणिआलकंतो कन्तो अन्दन्छि वेञ्छि अंवाल ।
ऊससि उम् विणतीरलच्छ उम्ल बहुलेह अंगामे ।। ७७

वक्रभणितानि कुतः कुत अर्धाक्षि प्रेक्षितानि ।
उच्छ्वसितुमपि न शक्यते छेकबहुले हतग्रामे ।।

व्या - अत्र काचिदसती स्वैरभणित विलोकनचातुर्येण त्वया किमाकृष्टं ते युवान इति पृष्टा तां प्रति विदग्धबहुले इंगिताकारवेदि जनप्रचुरे अस्मिन् ग्रामे उच्छ्वसितुमपि न पार्यते कुतो वक्रभणितानीत्यनेन स्वैरविहार-सुखासंभवादुद्भूतं स्वनिर्वेदं प्रकटितवतीत्यभिप्रायः । अत्र वाक्यप्रकाश्यो संलक्ष्यक्रमो भावध्वनिः निर्वेदस्य प्रतीतेः ।।७७।।

काचित् बालिकामाहः

तंथाविहोन्ति सहीओ पुन्तिए मारु वसु जन्थ थिंणासि ।
कथंविणिडञ्ज लीला तन्धविगिरि वाहिणीहोला ।। ७८
तत्रापि भवन्ति सख्यः पुत्रिके मा रुदिहि यत्र दत्तासि ।
तत्रापि निकुञ्जलीलास्तत्रापि गिरिवाहिनी गोदा ।।

व्या - अत्र काचिद्विदग्धा सखी सखीभिः समं गोदावरीतीरनिकुञ्जेषु स्वैरविहारलीलां स्मृत्वा श्वशुरग्रामगमनमनिच्छन्ती बालां प्रति त्वं यत्र दत्तापि तत्र सख्यादयस्सन्ति मारुदिहीत्यनेन तत्रापि तव स्वैरसुखम् सम्पत्स्यते गच्छेति प्रोत्साहितवतीत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः। अनेनाश्वासनेन तत्रापि चौर्यरतक्रीडाः संभविष्यतीति वस्तुनः प्रतीतेः ।।७८।।

In Public domain. Digitization Muthulakshmi Research Academy

नायिकावाक्यम्

रूपं अंछीसुठिअं अंहंसो अंगेषु जंविअंकंणे ।
हिअअं हिअएण समं विओलअंकीथ दंवेण ।। ७९

रूपमक्ष्णोः स्थितं स्पर्शोंगेषु जल्पितं कर्णे ।
हृदयं हृदयेन समं सहस्थितं वियोजितम् (किं) अत्र दैवेन ।।

व्या - कीथेत्यत्र लुगव्ययत्यदाद्यात्तदच इत्यथाद्यात्परस्स्याय्यमस्यादे रचोलुक् । अत्र काचित् प्रोषितभर्तृका विरहव्यथातिशयादष्टमावस्थाम्, प्राप्ता निरंतरचिन्तासमानीतदयितरूपादिकमुपालभमाना दैवेन किमत्र वियोजितं सर्वमुपस्थितमित्यनेन कथं मम हृदयमंगानि तप्यन्त इति सविस्मयं सखीमाहेत्यभिप्रायः । अत्र वाक्यप्रकाश्यो संलक्ष्यक्रामो रसध्वनिः संतापकारिणः प्रवासविप्रलंभस्य प्रतीतेः ।।७९।।

दूती जारमाह

भणकोण रूसलजणो पथिंजंतो अदेशकालंमि ।
दलवापु अरुअंतं पिअंवि पुंतं शवलमाआ ।। ८०

भणकोन रुष्यति जनः प्रार्थयमानः अदेशकाले ।
रतिव्यापृता रुदन्तं प्रियमपि पुत्रं शपति माता ।।

व्या - अत्र काचिदसतीं अनवसरे रतिं प्रार्थ्य तन्निरासात् विमनायमानमुपपतिं प्रति दूती अनवसरे याचमानाय को वा रुष्यति, तथाहि माता रतिकाले प्रियमपि पुत्रं रुदन्तं शपतीत्यनेन त्वत्कृत एवायं दोषः न तन्निमित्तक इति तं प्रोत्साहयतीत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्ति मूलोलंकारेण वस्तुध्वनिः। निदर्शनालंकारेण रतिप्रर्थनाभङगविमनस्कजार प्रोत्साहनस्य गम्यमानत्वात् ।।८०।।

काचित् सखीमाह

गअगंण गवअसेरिह सरभअसंडूलरंख जाईणं ।
छणाआ वाहवहुएअभअं दालंवणिंकन्तां ।। ८१

In Public domain. Digitization Muthulakshmi Research Academy

गजगंडगवयसैरिभशरभकशार्दूल ऋक्षजातीनाम् ।
स्तनौ व्याधवध्वा अभयं दातुमिव निष्क्रान्तौ ।।

व्या - अत्र काचिद्विदग्धा कस्याश्चिद् व्याधवध्वा निरवद्य मुदितौ अतीव मनोहरौ कुचकलशौ दृष्ट्वा सखीं प्रति अस्याः स्तनौ गजादीनामभयं दातुमिव निष्क्रान्तावित्यनेन अस्या ईदृग्विधौ स्तनौ दृष्ट्वा सर्वेपि पक्कणवासिनः शबरयुवानः विरहव्यथाकर्शिता मृगयां कर्तुमशक्ताः तदेकनिरताः तिष्ठन्तीति ज्ञापितवतीत्यभिप्रायः । अत्र कविनिबद्धवक्तृप्रौढ़ोक्तिसिध्दार्थशक्तिमूलोलंकारेण वस्तुध्वनिः । उत्प्रेक्षया व्याधयुवानः तत्परतया मृगयायामशक्ता इति वस्तुनः प्रतीतेः ।।८१।।

काचित् सखीमाह

परिपुच्छिआण जंपल गहिआ विंजरल चुंबिआ रुअल ।
तुह्लीका णववहू आकिआ वराहेण दलएण ।। ८२

परिपृष्टा न जल्पति गृहीतापि स्फुरति चुम्बिता रोदिति ।
तूष्णीका नववधूः कृतापराधेन दयितेन ।।

व्या - तुह्लीकेत्यत्र दैवादिपाठात् द्वित्वम् अत्रैषा कृतापराधे प्रिये गृहमागते सति मानवशेन तूष्णीका दर्शनस्पर्शनसंभाषणादि रहिता तेन परिपृष्टा न जल्पतीत्यादिना अंतस्संतप्यमानाया बालिकाया रोष विशेषं पश्येति काचित् सखीमाहेत्यभिप्रायः । अत्र वाक्यप्रकाश्यो संलक्ष्यक्रमो भावध्वनिः । ईष्यामानस्य प्रतीतेः ।।८२।।

काचिद्वणिजमाह

वाणियअअहंरिदन्ताकन्तो अह्माण वंखकिञ्चीअ ।
जावलुलि आलअमु हीघरंमि परिवण्ट ए सुह्ला ।। ८३

वाणिजक हस्तिदन्ताः कुतोस्माकं व्याघ्रकृत्तयश्च ।
यावल्लुलितालकमुखी गृहे परिवर्तते स्नुषा ।।

In Public domain. Digitization Muthulakshmi Research Academy

व्या - किञ्चि इत्यत्र चः कृत्ते च त्वर इति चत्वः । अत्र काचित् व्याथजरती जगदन्तान् व्यघ्रकृत्तींश्च क्रेतुमागतम् वणिजं प्रति एषा स्नुषा लुलितालकमुखी यावद् गृहे वर्तते तावदस्माकं गजदन्तव्याघ्रकृत्तयश्च कुत इत्यनेन अस्याः पति अनुरागातिशयात् नवयौवनां विहाय क्षणमपि स्थातुमशक्तस्सन् मृगयां न करोतीत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलोलंकारेण वस्तुध्वनिः। उत्तरालंकारेण तत्पतिस्तदासक्त्या मृगयां न करोतीत्यस्य वस्तुनः प्रतीतेः।।८३।।

काचित् सहचरमाह

अंणाणविहोन्तिमुहो पह्मलधवलाल दीहक णाइ ।
णअणाल सुन्दरी एतहपरिदंझं ण आणन्ति ।। ८४

अन्यासामपि भवति मुखे पक्ष्मलधवळानि दीर्घकृष्णानि ।
नयनानि सुन्दरीणां तथा परिद्रष्टुं न जानन्ति ।।

व्या - अत्र काचित् प्रियया भावगंभीरैरवलोकनैरपहृतमनाः सहचरस्य पुरस्तात् अनुरागातिशयात् तानि स्मारं स्मारं तां प्रशंसतीत्यभिप्रायः । अत्र पदप्रकाश्योसंलक्ष्यक्रमो भावध्वनिः तथेतिपदेन पूर्वानुभूतेन प्रियाविलोकनेन विश्लेषस्मरणस्य प्रतीयमानत्वात् ।।८४।।

कस्याश्चिदसत्या वचनम्

महु एहि कीव पन्थ अजलहरसिणि अंसण णिअंबाओ ।
साहेमिकं सरंणे दूरे गामो अहं एंका ।। ८५

मधूकैः किं पान्थ यदि हरसि निवसनं नितंबात् ।
कथयामि कस्यारण्ये दूरे ग्रामोऽहमेका ।।

व्या - महु एहीत्यत्र वामधूक इत्यूकारस्य उकारुणि अंसण शब्दो वस्तुवाचीदेश्यः - काचिदसती युवतिः वनांतरमुपागत्य मधूककुसुमानि संगृह्य प्रतिनिवर्तमाना मध्ये ग्रामं कश्मिंश्चिदभिरूपे यूनि पथिके तान्यादातुं करं प्रसारयति सति तं प्रति हे पांथ मधूकैः किं वा नितंबादंशुकं यदि हरसि

तथारण्ये कस्य कथयामि । ग्रामो दूरे अहमेकेत्यनेन तद्दर्शनादुत्पन्न मन्मथव्यथापदेशादुपभोगाय वासो हरेति प्रतिबोधितवतीत्यभिप्रायः अत्र स्वतस्सिद्धार्थशक्तिमूलो विधिनिषेधरूपेण वस्तुना विधिरूपो वस्तुध्वनिः अनेन संभोगार्थं वस्त्रमपहरेति प्रतीतेः ॥८५॥

कस्याश्चिदसज्जरत्या वचनम्

णिअद इ सहासुआ पन्थअअणेवंच सुपहेण ।
गहवलदू आ दुंलंघवा उराठाल इहहअं गामे ॥ ८६

निजदयिता दर्शनोत्सुक, पान्थ अन्येन व्रजपथा ।
गृहपतिदुहितातिदुर्लंघ वागुरा तिष्ठतीह हतग्रामे ॥

व्या - अत्र काचिदसज्जरती कमप्यभिरूपं पथिकयुवानं दृष्ट्वा तं प्रति हे पान्थ निजदयितादर्शनोत्सुक अन्येन पथाव्रज - अस्मिन् हतग्रामे दुर्लंघवागुरा गृहपतिसुता तिष्ठतीत्यनेन अत्र काचिद्रमणीयाकृतिर्युवतिरास्ते सा त्वया द्रष्टव्येति तं प्रोत्साहितवतीत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलो विधिनिषेधरूपेण वस्तुना विधिरूपो वस्तुध्वनिः । अनेन अवश्यमेषा द्रष्टव्येति प्रतीतेः ॥८६॥

नायिकोक्तिः

साहेन्ति सहि सुहअं खणेखणे दूमिअ इमंझ कए ।
संभावणेण करणिंज सरि अंदाव विरलतु ए ॥ ८७

साधयन्ती सखि सुभगं क्षणे क्षणे दूनसि मम कृते ।
सद्भावस्नेहकारिणी यसदृशं तावद्विरचितं त्वया ॥

व्या - अत्र काचिन्नायिका संभोगखिन्नां सखीं प्रति सद्भावेत्यादि विपरीतलक्षणया मत्प्रियं रमयंत्या त्वया शत्रुत्वमाचरितमित्यनेन लक्षितार्थेन तस्याः सापराधित्वं प्रकाशितवतीत्यभिप्रायः । अत्र लक्षणामूलो वाक्यगतात्यन्ततिरस्कृता विवक्षितवाच्यो ध्वनिः । अनेन लक्ष्यार्थेन सख्यास्सापराधित्वप्रकाशनप्रतीतेः ॥८७॥

In Public domain. Digitization Muthulakshmi Research Academy

कस्याश्चित् सख्या वचनम्

आसालअं अणाएणा जेन्ति तंतिएण बन्धधायिलं ।
ओरमसुल सह एंह्लिरं विंजल गहवलंच्छेतं ॥ ८८

आसादितमन्यायेन यावत्तावता बधान धृतिम् ।
उपरमवृषभेदानीं रक्ष्यते गृहपतिक्षेत्रम् ॥

व्या - अत्र क्षेत्रशब्देन पत्नी व्यज्यते । अत्र काचिद् विदग्धा सखी कमपि जारं कस्याश्चिदसत्या गृहं प्रवेश्य परिपालयन्ती तदनु तदीये कस्मिंचित् समागच्छति सति असादितमित्यादिना वृषभनिवारणपरेन वाक्यकदम्बकेन तदासक्त्या चिरयन्तमुपपतिमुपभोगान्निवारयतीत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलो निषेधरूपेण वस्तुना निषेधरूपो वस्तुध्वनिः। वृषभनिवारणेन तन्निवारणस्य प्रतीतेः ।।८८।।

कस्याश्चिद्वचनम्

उञ्चिलसु पठिअकुसुमं मादुणुसेहालिअं हलिअसुंणे ।
एसअवसाणविरसो ससुरेण सुदो विलअसंदो ।। ८९

उच्चि नु पतितकुसुमं माधुनु शेफालिकां हालिकस्नुषे ।
एषोवसानविरसः श्वशुरेण श्रुतोवलयशब्दः ।।

व्या - अत्र काचिच्चतुरा सखी गृहपश्चाद् भागस्थितेषु शेफालिका कुञ्जेषु उपपतिना सह रममाणां सखीं पालयन्ती रभसजनितं तदीयवलयशिंजितमाकर्ण्य तां प्रति उच्चिनु पतितकुसुममित्यादिना वाक्यकदम्बकेन चौर्यरते प्रसक्ते वलयशब्दो न कर्तव्य इति निवारितवतीत्यभि-प्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलो विधिनिषेधरूपेण वस्तुना विधिरूपो वस्तुध्वनिः उच्चिनु माधुनु इति विधिनिषेधाभ्यां वलयशब्दो न कर्तव्य इति निषेधस्य प्रतीतेः ।।८९।।

In Public domain. Digitized by Muthulakshmi Research Academy

कस्याश्चिद्वचनम्

ईसालु ओव ईसेरंतिं महु एणदेल उंचेउं ।
अंचे उ अवेणंचि अमा ए अंल लंजिअसहावो ।। ९०

ईर्ष्यावान् पतिरस्याः रात्रौ मधुकानि न ददात्यपचेतुम् ।
उपचिनोत्यात्मनव मातः अति ऋज्जुस्वभावः ।।

व्या - अंपणेति स्वयमर्थे निपातितः । स्वयमंपणेत्युक्तत्वात् । अत्र काचिद्विदग्धा विदितप्रतिवेशिनी वृत्तान्ता सखीं प्रति अस्याः पतिः ईर्ष्यावान् रात्रौ मधूकान्यपचेतुं न ददाति अति ऋज्जुस्वभावः स्वयमेव पचिनोतीत्यनेन स्वगृहिण्यावनव्यभिचारशंकया तां परिहृत्य एष स्वयं गच्छति गृहे व्यभिचारं न जानाति पश्येति सोपहासमाहेत्यभिप्रायः ।

अत्र स्वतस्सिद्धार्थशक्तिमूलो वस्तुना संसृष्टो वस्तुध्वनिः ईर्ष्यावान् मधूकान्यपचेतुं न ददातीति वाक्यप्रकाश्येन सहसंसर्गात् ।।९०।।

श्वश्रून् प्रति कस्याश्चिद्वचनम्

गामणि घरंमि णंता एकंचि अपाडलालहंग्रामे ।
बहुपाडलंव सीसं दिऽरंणव सुन्दरं एदम् ।। ९१

ग्रामणी गृहे अत्ता एकैव पाटला इह ग्रामे ।
बहुपाटलमिव शीर्षं देवरस्य न सुन्दरमेतत् ।।

व्या - अत्र ग्रामणीत्यनेन तस्य प्रतीकारसामर्थ्यं गम्यते । बहुपाटल शिर्षमित्यनेन देवरस्य तद्गृहिणी संबंन्धो गम्यते । न सुन्दरं न शोभनम् । अनर्थपर्यवसायीत्यर्थः । अत्र काचिदसती देवरानुरक्ता इह ग्रामे ग्रामणी गृहे एकैक्पाटल इत्यादिना वाक्यकदम्बकेन ग्रामणी गृहप्रवेशे महान्तमनर्थं प्रदर्श्यते न स्वाभिलषितसिद्धये तस्मादेनं निवारयेति श्वश्रू माहेत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलो वस्तुना संकीर्णो वस्तुध्वनिः ग्रामण्यादि पदव्यंग्ये स्वार्थसिद्धये तन्निवारणरूपस्य व्यंग्यस्य अनुग्राह्यत्वात् ।।९१।।

In Public domain. Digitization Muthulakshmi Research Academy

कस्याश्चिदसत्या वचनम्

बोल सुणओ विपंणो अंत मतापई विअंणंतो ।
फलिईविमोडि आमहि सएण कोदं सकाहेल ॥ ९२

बोलो दुष्टः भिन्नकर्णो वा स चासौ शुनकश्च विपन्नः ।
अत्तामत्ता पतिरप्यन्यतः कार्पासोऽपि माभूदितो महिषकेण कस्तस्य कथयति॥

व्या - अत्र काचिदसती हालिकवधूः शुनको विपन्नः मत्ता माता पतिरन्यतः तस्मात् कार्पासोपि महिषेण भग्नः कस्तस्य कथयतीत्यनेन प्रतिबन्धकानां दुष्टशुनकादीनामभावं सूचयन्ती वा तद्दूती वृत्या प्रवेशकालोयं त्वया समागंतव्यमिति विधेः प्रतीतेः ॥९२॥

कस्याश्चिद्विदग्धाया वचनम्

पविसंति घरं दारं विलाविअवअणा विलोवि ऊणावहे ।
खंदे मोंतूणघटं हाहाणं ठोन्ति रूऽसि सहकिति ॥ ९३

प्रविशन्ती गृहद्वारं विवलितवदना विलोक्य पंथानम् ।
स्कन्धे मुक्त्वा घटं हाहा नष्ट इति रोदिषी सखि किमिति ॥

व्या - अत्र काचिद्विदग्धा प्रातिवेशिकीं कांचित् स्नुषां प्रति, हे सखि गृहद्वारं प्रविशन्ती विवलितवदना पंथानं विलोक्य स्कन्धे स्थितं घठं मुक्त्वा हा हा नष्ट इति किं रोदिषीत्यनेन, नदीतीरलतागृहे कृतसंकेतवेलामतिवाह्य इदानीं पथि गच्छंतं जारं दृष्ट्वा जलाहरणकर्मणि समाप्तेऽपि पुनर्गमनसिद्धये स्वयमेव घटं पातयित्वा किमिति वृथा रोदिषि शीघ्रमेव पुनरपरं घटं गृहीत्वा गच्छेति अनुमतवतीत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलालंकारेण वस्तुध्वनिः घटपातनेन पुनस्संकेतस्थानगमनेच्छा प्रतीतेः ॥९३॥

कस्याश्चिदसत्यावचनम्

मा पन्थरुध सुवहं अवेहिबालअ असेसिअंहिरिअ ।
अहेअणरुङ्का आम् सुंणंघरअं अवंकमसि ॥ ९४

मा पान्थ रुंदि पंथानं अवेहि बालक अशेषितह्रीक ।
पंथानं मारुंधि वय मरिक्तः शून्यं गृहमिवाक्रमसि ।।

व्या - इत्यनेन कामान्धतया पथिक जनसमक्षं गृहीतुकामं जारं निवारयन्ती उपमानकथनव्याजेन संकेतस्थानं शून्यगृहमस्ति चेत् तत्र गच्छाव इति तं प्रबोधितवतीत्यभिप्रायः - अत्र स्वतस्सिद्धार्थ-शक्तिमूलोलंकारेण वस्तुध्वनिः उपमानेन शून्यगृहगमनप्रतीतेः ।।९४।।

नायिकावचनम्

अहसंभाविअ मंगोसुहअ तुलंचि अणवरणिंपूढो ।
णंहिंहिअए अंणं अंणंवा आएलोअंसं ।। ९५

असोसद्भावितमार्गः सुभग, त्वयैव केवलं निर्व्यूढः ।
इदानीं हृदयेऽन्यदन्यद्वाचिलोकस्य ।।

व्या - अत्र काचित् प्रगल्भानायिका गोत्रस्खलितं नायकं प्रति लोकस्य मनस्यन्यद् वाच्यन्यद्, तव तु यन्मनसि वर्तते तदेव वाचि, तस्मात् त्वया सद्भावितमार्गः केवलं निर्व्यूढइत्यनेन तं प्रशंसंतीव विपरीतलक्षणया न केवलं तत् गृहगमनमेव, तन्नामधेयग्रहणमपि मम पुरस्तात् करोषि तस्मात् त्वादृशो दुरात्माकश्चिन्नास्तीति तमुपालभत इत्यभिप्रायः ।

अत्र लक्षणा मूलो वाक्यगतात्यन्ततिरस्कृता विवक्षितवाच्यो ध्वनिः अनेन दुरात्मेत्युपालंभस्य प्रतीतेः ।।९५।।

कस्याश्चिद् स्वैरिण्या वचनम्

मए घरोप अरणं अंजखुणंधिन्ति साहि अंतुमए ।
ताभण कीकरणिंजं एमेव णवासरो ठाल ।। ९६

मातर्गृहोपकरणं अद्य खलु नास्तीति कथितं त्वया ।
तस्माद्भण किं करणीयं एवमेव न वासरस्तिष्ठति ।।

व्या - एवमेवेत्यत्र एवमेव देवकुलप्राकारक यावज्जीवितावदावर्तमान

In Public domain. Digitization Muthulakshmi Research Academy
तावतीवातिवर्तिन स्यान्ति लोपको तस्य लोपः --

अत्र काचिदसती मातरमद्य गृहोपकरणं नास्तीत्येवमादिना वाक्येन स्वैरविहारार्थिनीयं कंच नाभिसर्तुकामा गृहोपकरणव्याजेन मातरं पृच्छतीत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः स्वैरविहारस्य गम्यमानत्वात् ।।९६।।

कस्याश्चिदसत्या वचनम्

उप णिंचल णिंपन्दा बिसिनीपन्तं मिरेहलबलाआ ।
णिंमल मरगअ भाअण वसिंठिआ संखसिंपिंव ।। ९७

पश्य निश्चलनिष्पन्दाबिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनप्रतिष्ठिता शंखशुक्तिरिव ।।

व्या - राजते पश्येति कथनव्याजेन बलाका निष्पन्दतया जनरहितोयं देशः ते नायं संकेतस्थानं भवितुमर्हति, इति तटस्थं जारं श्रावयतीत्यभिप्रायः अत्रोपमालंकारः । स्वतस्सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः बलाका निष्पन्दता व्यंग्येन जनराहित्येन संकेतस्थानस्य गम्यमानत्वात् ।।९७।।

कस्याश्चिदसच्चरिताया वचनम्

णालोलअणंदमणा अंता मं घरभरंमि स अलंमि ।
खणारमेंतं जहसंझा ए होल णपहोल विंसामो ।। ९८

प्रेरयत्यनार्द्रमना अत्ता मां गृहभरे सकले ।
क्षणमात्रं यथा संध्यायां भवति न वा भवति विश्रामः ।।

व्या - अत्र कस्याश्चित् स्नुषा प्रातिवेशिनीं अनार्द्रमना श्वश्रूरित्यादिना वाक्यकथनव्याजेन मम दिवा रात्रौ च नावसरः, क्षणमात्रम् संध्यायां विश्रमोस्ति तदानीं त्वया समागन्तव्यमिति अवसरापेक्षिणं तटस्थं जारं श्रावयतीत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलोलंकारेण वस्तुना वस्तुध्वनिः- अनेन संध्यासमये त्वया समागंतव्यमिति वस्तुनः प्रतीतेः ।।९८।।

In Public domain. Digitization Muthulakshmi Research Academy

कस्याश्चित् सख्यावचनम्

सुंवल समासअमीं सलतुंझपिओ अंजवहर मेंतेण ।
एमे अकिंतिचिंठसि तासहिसंजेसु करणिंजं ॥ ९९

श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण ।
एवमेव किमिति तिष्ठसि तस्मात् सखि सज्ञकरणीयम् ॥

व्या - अत्र काचित् सखी प्रातिवेशिकी स्वैरिणीं कस्याश्चित् स्नुषां प्रति श्वश्रासन्निधौ हे सखि प्रियोद्य प्रहरमात्रेण समागमिष्यतीति श्रूयते तस्मात् करणीयं सज्ञय, एवमेव किमिति तिष्ठसीत्यनेन प्रियागमस्य याममात्रं विलंबोस्ति । एतावति काले शाकाद्यानयनव्याजेन निर्गत्य संकेतागत मुपपतिमुपभोगेन कृतार्थय इत्यावेदयतीत्यभिप्रायः अत्र स्वतस्सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः अनेन अस्मिन्नंतरे व्याजान्निर्गत्य तदुपभोगः क्रियतामिति वस्तुनः प्रतीतेः ॥९९॥

कस्याश्चिद् वचनम्

गामे रुहहामी गामेवसामि णअरं ठिलं णआणामि ।
णाअरिणं वहिणो हरेमि जाहेमि साहेमि ॥ १००

ग्रामीणोहं ग्रामे वसामि नगरस्थितिं न जानामि ।
नागरिकाणां पतीन् हरामि या भवामि सा भवामि ॥

व्या - रुहामीत्यत्र तद् व्यत्ययश्चेति लुङ स्थाने लट् अत्र काचित् ग्रामीणा नायिका सखीं प्रति ग्रामे जाता ग्रामे वसामि नगरस्थितिं न जानामि या भवामि सा भवामि तथापि नागरिकाणां पतीन् हरामीत्यनेन तया सह सल्लापव्याजात् स्वस्यरूपयौवनकळाकौशलानि नवागतं कमपि नागरिकं वा तद्दूतीवृत्या श्रावयतीत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलोलंकारेण वस्तुध्वनिः विभावनया वस्तुनः प्रतीतेः ॥१००॥

In Public domain. Digitization Muthulakshmi Research Academy

कस्याश्चिद् प्रजावत्या वचनम्

खण पाहुणिआ देअर जाआएसुहअ तीविदे भणिआ।
रुरअल घरोतं कडलिनीघरंरंमि अणुणिंजउ वराई ॥ १०१

क्षणप्राहुणिका देवरजाया सुभग किमपि भणिता।
रोदिषि (ति) गृह पश्चाद् भाग फलिनीलताकुञ्जे वराकी ॥

व्या - अत्र काचित् प्रजावती देवरं प्रति हे सुभग तव जायाक्षणप्राहुणिका सा किमपि भणिता गृहपश्चाद्भागफलिनी लताकुञ्जे रोदिति वराकी अनुनीयतामित्यनेन, इयं त्वया अनुरक्ता सती ग्रामान्तरादुत्सवव्याजेनागता भवन्तमदृष्ट्वा लतागृहे भृशमुत्कन्ठिता तिष्ठति तामुपभोगेन संभावय इत्याभिप्रायः। अत्र स्वतस्सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः। अनेन तदुपभोगक्रियतामिति वस्तुनः प्रतीतेः ॥१०१॥

कस्याश्चिद् वचनम्

ताण गुणं गहणाण ताणुंकंठाणकं संपेमंस।
ताणभणिआण सुन्दर असरिसओ होलाओसाओ ॥ १०२

तेषां गुणग्रहणानां तासामुत्कण्ठानां तस्य प्रेम्णः।
तेषां भणितानां सुन्दर असदृशतो भवत्यवसादः ॥

व्या - अत्र तत्पदै तत्तदतिशयो गम्यते अत्र काचिदुपारूढ़ यौवनमदा कामिनी बहुविधसुरततंत्र समर्थोहमिति विकत्थमानं अंतराश्रांतं कान्तं प्रति- हे सुन्दर तेषां गुणग्रहणादीनामसदृशोऽवसादो भवतीत्यनेन तमपहसन्ती स्वयं पुरुषायितोत्सहन इत्यभिप्रायः अत्र स्वतस्सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः अनेन पुरुषायित करणेच्छा प्रतीतेः ॥१०२॥

कस्याश्चित् स्वैरिण्या वचनम्

बहुपुंफ भारावणमिअ भूमीगअसाहो सुण सुविणंवं।
कोलातडविअ उकुडुंगमहूआ सणिअंगलिंजासु ॥ १०३

In Public domain. Digitization Muthulakshmi Research Academy

बहुपुष्पभारावनमितभूमिगतशाखश्रृणु विज्ञाप्यम् ।
गोदातट विकटकुडुंग मधूकशनैर्गलिष्यसि ॥

व्या - अत्र काचिदसती बहुपुष्पभारावनमितभूमिगतशाखैर्गोदातट विकटकुडुंगमधूके कृतसंकेता तत्रोपपतिना रममाणा कदाचिदस्य विरल पुष्पतां दृष्ट्वा हे मधूक शनैर्गळ, इत्यनेन इतः परमपि कानिचिद्दिनानि तेन समं रिरंसुः कुसुमापनयनव्यपदेशेन स्वनिर्गमनसिध्दये तं प्रार्थयत इत्यभिप्रायः । अत्र स्वतस्सिद्धार्थशक्तिमूलो वस्तुना वस्तुध्वनिः अनेन रिरंसोस्तस्याः निर्गमनेच्छा प्रतीतेः ॥१०३॥

कवेर्वाक्यम्

घरिणी ववेसिअ जिघरे घरं थणचिञ्छि ईठाजा (आ)
मिलिआ चिञ्छिं ईजारावंचा घारिणी घरंतोअ ॥ १०४

गृहिणी प्रवेशित जारे गृहे गृहस्थेन असती स्थापिता ।
मिलिता वसती जारौ पश्चाद्गृहिणी गृहस्थश्च ॥

अत्र वाक्यार्थः स्पष्टः । अभिप्रायो व्यक्त एव ॥१०४॥

इति
पेद कोमठि वेमभूपालेन कृता
सप्तशतीसारटीका भावदीपिका
संपूर्णा ॥

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकादमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2023

978-93-80171-83-8